वाक्य-मुक्तावली

लेखक

चारु देव शास्त्री

प्रकाशक

भारतीय संस्कृत भवन

जालन्धर शहर

वाक्यमुक्तावली

(छात्रकदम्बकस्य वाक्सरण्यामभिविनिनीषया स्वकृतिभ्य एव
कृतो वाक्यमुक्तामयः सङ्ग्रहः)

इयं

लवपुरे संस्कृताध्यापकचरेण वाक्यपदीयस्य संस्कर्त्रा श्रीगान्धिचरितस्य प्रणेत्राऽनुवादकलोपसर्गार्थचन्द्रिकाप्रस्तावतरङ्गिणीशब्दापशब्दविवेकव्याकरणचन्द्रोदयादिग्रन्थानां निर्मात्रा श्रीरामकृष्णतनुजनुषा एम. ए. एम. ओ. ऐल् इति विरुदभाजा

श्री चारुदेवेन शास्त्रिणा

प्रणीता

सेयं

जालन्धरे 'माईहीरां' द्वारे 'भारतीयसंस्कृतभवन'स्याधीशैः
पुस्तकविक्रायैः श्रीकृष्णानन्दशास्त्रिभिः स्वेन व्ययेन
प्रकाशितः । पुनर्मुद्रणाद्यधिकारश्च
तैरेव स्वायत्तीकृतः ।

प्रथमं संस्करणम्]　　संवत् २०१३　　[मूल्यम् ३).

प्रकाशक,
श्रीकृष्णानन्द शास्त्री, भारतीयसंस्कृतभवन,
माईहीरां गेट, जालन्धर ।

मुद्रक :—
श्री देवदत्त शास्त्री, विद्याभास्कर
विश्वेश्वरानन्द वैदिक शोध संस्थान प्रेस,
साधु आश्रम, होशिआरपुर ।

निवेदना

अस्या वाक्यमुक्तावल्या ग्रन्थने कोऽभिप्रायो ममेत्युल्लसेद् विविदिषा विदुषाम्। न हि प्रयोजनमन्तरा प्रवृत्तिः प्रेक्षावतामिति यावत् प्रयोजनं नोक्तं तावत्कुतोऽस्याः परिग्रहस्तत्कृतः स्यादिति तदुच्यते—इह मयाऽनुवादकलाप्रस्तावतरङ्गिणीशब्दापशब्दविवेकसमाख्याभ्यस्तिसृभ्यः स्वाभ्यः क्रियाभ्यः समाहृत्य समाहृत्य वाक्यमुक्ता अयं सङ्ग्रहः प्रणीतो वाचा तत्तदर्थनिबन्धनायाऽलंबुभूषून्प्रणतान्प्राज्ञानभियोगवतः शिष्यरूपान् हृदयङ्गमामपास्तसमस्तदोषकलङ्कपङ्कां शिष्टजुष्टां वाग्धोरणीं परिचाययिष्यामीति। का नाम निरवद्या वाचां पद्धेति न लक्षणमात्रेण शक्यं निरूपयितुम्। कथंचित्सम्भवन्त्यपि तन्निरूपणाऽकिञ्चित्करीति नार्थोनया। निदर्शनान्येव वाक्यरूपाणि तां व्यक्तरूपतामलं नयन्ति। अनुकार्यवाक्यविसर एवानुशील्यमानोऽभीष्टामादधाति व्युत्पत्तिं व्युत्पित्सूनाम्। लोके हि वाचि वाचि प्रतिनियतस्तत्तदभिधेयाभिधानप्रकारः, यं तद्विद आसेवन्ते, मा स्मैनं व्यभिचारील्लोक इति च कामयन्ते। संस्कृतेपि परम्परीणः पूर्वसूरिभिराद्दतोऽस्ति कश्चिद् वाग्व्यवहारविशेषः। स गवेषणीयः, स च शिक्षणीयः। इह च स शरीरबद्ध इव संनिधापित इत्यनुत्तमं तमनुशिष्टाः शिष्याः।

अत्र मूलसंस्कृतवाक्यानि हिन्दीभाषान्तरसहचरितानि निवेशितानि बालैरपि यथा सुज्ञानानि स्युः। तत्रापि स्थाने स्थानेऽर्थवैशद्यकराणि टिप्पणानि धृतानि, व्याख्यागम्यानि च पदानि व्याकृतानि, पदार्थविकासविवरणानि च सोपज्ञानि विन्यस्तानि।

मन्ये कृतिरियं मे यथेष्टमुपकरिष्यति विनेयानां नन्दयिष्यति च चेतः सचेतसां विज्ञातॄणाम्। सदसद्विवेचनचणा वाग्व्यवहारकोविदाः पण्डिततल्लजा निपुणं परीक्षन्तामिमां मे क्रियामिति सम्प्रार्थ्य विरमति विदां विधेयः।

चारुदेवशास्त्री

वाक्य-मुक्तावली

ओं नमः परमात्मने ।

नमो भगवते पाणिनये । नमः शिष्टेभ्यः ।

स्वोपज्ञं मौक्तिकच्छायो नृत्यत्प्रायपदात्मकः ।
वाक्योच्चयः क्रियादेष विदुषां मुदमुत्तमाम् ॥१॥

वाक्यमुक्तावली सैषा प्रकामं प्रथतां भुवि ।
कण्ठेन धारयन्त्वेतां विनेयाः सौष्ठवप्रियाः ॥२॥

१. वाचि शिक्षमाणस्य प्रथमवैयाकरणस्य साचिव्यं किमपि चिकीर्षामीति वाक्यमुक्तावलीं प्रक्रतोऽस्मि ।

२. एहि पुत्रक ! परिष्वजस्व मां पीडितम् । चिरमुत्सुकोऽस्मि ते दर्शनेन ।

३. स्वयं कृते पुण्यपापे अनुवर्तमानो जायस्व म्रियस्वेत्येवायं संसरति देही ।

---

१. शिक्षमाणस्य—शक् धातु से सन् प्रत्यय करने पर लट् में शिक्षते रूप बनता है । जब जिज्ञास्य विषय में शक्ति चाहता है ऐसा अर्थ हो तो 'शिक्षेर्जिज्ञासायाम्' इस वार्तिक से सन्नन्त 'शिक्ष' से आत्मनेपद होता है। प्रथम वैयाकरणः =जो अभी-अभी गुरु के पास व्याकरण पढ़ने गया है । इस अर्थ में 'प्रथमोऽचिरोपसम्पत्तौ' (६।२।५६) यह [illegible] प्रमाण है। व्याकरण पढ़ने वाले को वैयाकरण कहते हैं, और व्याकरण जानने वाले को भी । 'तदधीते तद्वेद' (४।२।५९) से यहाँ तदधीते अर्थ में [illegible] समझना चाहिये । साचिव्यम्—सचिवस्य सहायस्य कर्म । [illegible] । 'सचि' शब्द से 'वप्रकरणेऽन्येभ्योऽपि दृश्यत इति वक्तव्यम्', इस [illegible] से मत्वर्थीय 'व' प्रत्यय हुआ है । 'सचि' सखिपर्याय वैदिक शब्द है । यस्तित्याज सचिविदं सखायम् (ऋ. १०।७१।६)। 'सचिव' के दो अर्थ हैं—मन्त्री और सहाय। मन्त्री सहायः

ओं नमः परमात्मने ।

नमो भगवते पाणिनये । नमः शिष्टेभ्यः ।

निजविनिर्मित, शुभ्रमौक्तिक-तुल्य यह वाक्यावली
नर्तकी के नृत्यसी, विकसित करे गुणि-मन-कली ॥१॥

विख्यात हो भू पर सदा यह वाक्य की मुक्तावली ।
कण्ठ-प्रिय हो शिष्य जन को, वाग्मि-मन-मोद-स्थली ॥२॥

१. वाणी में समर्थ होना चाहते हुए व्याकरण पढ़ना प्रारम्भ करने वाले (छात्र) की कुछ सहायता करना चाहता हूँ, अतः मैं ने वाक्यमुक्तावली को आरम्भ किया है ।

२. प्रिय पुत्र आओ । मुझे गाढालिंगन करो । मैं चिर से तेरे दर्शन के लिये लालायित हूं ।

३. अपने किये पुण्य पाप के अनुसार यह देही जन्म-मरण के चक्कर में पड़ता है ।

सचिवौ—अमर । प्रकृतः =कर्तुमारब्धवान् । यहाँ 'क्त' आदि कर्म में है और आदि कर्म में 'क्त' आदिकर्मणि क्तः कर्तरि च (३।४।७१) से कर्ता में भी होता है, और भाव व कर्म में भी । यहाँ 'कर्ता' में हुआ ।

२. पीडितम् यहाँ क्रिया विशेषण है । अर्थ है—गाढम्, दृढम् =कस कर (पं. घुट कर) । दर्शनेन—यहाँ 'प्रसितोत्सुकाभ्यां तृतीया च' (२।३।४४) से तृतीया हुई ।

३. जायस्व म्रियस्व में 'समुच्चयेऽन्यतरस्याम्' (३।४।३) इस सूत्र से क्रियासमभिहार अर्थ में लोट् हुआ । 'समुच्चये सामान्यवचनस्य' (३।४।५) से सामान्यवचन 'संसरति' का अनुप्रयोग हुआ । जनन मरण इन दोनों का ही तो एक नाम संसरण है । संसरण=आवागमन ।

४. नाभिप्रेमस्त्वं धर्ममेव सततमनुरुन्ध्या इति, अर्थकामावपि यथाकालं जुषस्व।

५. इमे दोषा गुणांस्तिरस्कुर्वन्ति महतामपि।

६. किं विधवापुनरुद्वाहस्य शास्त्रदृष्टतां सिषाधयिषस्युताद्यत्वे तदुपयोगिताम्।

७. अप्यन्तरायाण्यार्य।

८. यन्मान्या विशेषविदो दुर्विधा इत्यवमन्यन्ते लोकेन स दुर्नयः।

९. अत्रार्थे किमप्युपस्तम्भकं प्रमाणं नोपलभामहे।

१०. अभ्रविलायं स वरं विलीनः कल्याणमतिषु सुजनेषु कष्टायते यः।

११. विसिन्वन्ति विषयिणमनुबध्नन्ति स्वेन रूपेणेति विषयाः।

१२. भुवनप्रथितप्रख्यानां क्षत्रियपुङ्गवानां भूरेषेति कस्य नेहाभिमानः।

---

५. तिरस्कुर्वन्ति=आच्छादयन्ति=ढाँपते हैं। तिरस् शब्द के दो अर्थ हैं—अन्तर्धान और पार्श्व। जो अपमान अर्थ है वह लक्षणा से प्राप्त होता है। जो अपमानित होता है वह अपने आप को छिपाता है, अतः तिरस्कृत शब्द का अपमानित अर्थ में प्रयोग होने लगा।

६. सिषाधयिषसि=साधयितुमिच्छसि।

७. 'अपि' यहाँ प्रश्नार्थक है। 'अन्तरायाणि' में 'अन्तः शब्दस्याङ्—' इत्यादि वार्तिक से 'अन्तर्' की उपसर्ग संज्ञा हो कर 'आनि लोट्' (८।४।१६) से णत्व हुआ।

८. दुर्नयः में 'दुरः षत्वणत्वयोरुपसर्गत्वप्रतिषेधो वाच्यः' इस से दुर् की उपसर्गसंज्ञा का निषेध हो गया। और 'उपसर्गादसमासे—'(८।४।१४) से जो णत्व प्राप्त था सो न हो सका।

४. हमारा यह अभिप्राय नहीं कि तू नित्य धर्म का ही अनुसरण करे, समयानुसार अर्थ व काम का भी सेवन कर।
५. ये दोष बड़े लोगों के भी गुणों को दृष्टि से ओझल कर देते हैं।
६. क्या तुम विधवाविवाह की शास्त्रानुकूलता सिद्ध करना चाहते हो अथवा उसकी आजकल उपयोगिता ?
७. श्रीमन्, क्या मैं अन्दर आ सकता हूँ ?
८. जो विशेषज्ञ मान के योग्य होते हुए लोगों से इसलिये अपमानित किये जाते हैं कि वे दरिद्र हैं, यह दुर्नीति है।
९. इस विषय में हमें कोई समर्थक प्रमाण नहीं मिलता।
१०. उसका मेघ की तरह नष्ट हो जाना अच्छा है जो कल्याणी बुद्धि वाले सत्पुरुषों के प्रति पाप करना चाहता है।
११. विषयी पुरुष को अपने स्वरूप के साथ जकड़ देते हैं इसलिये इन्हें विषय कहते हैं।
१२. लोक-प्रसिद्ध ख्याति वाले क्षत्रिय-धुरन्धरों की यह भूमि है, अतः इस पर किसका अभिमान नहीं।

---

९. 'उपस्तम्भकम्' में मूर्धन्य (ष्) किसी से भी प्राप्त नहीं। अतः उपष्टम्भक शब्द संस्कारहीन है।

१०. 'अभ्रविलायम्' में 'उपमाने कर्मणि च' (३।४।४५) से णमुल् हुआ। यथाऽभ्रं विलीयते तथा। यहाँ उपमान कर्ता है। 'कष्टायते' में 'कष्टाय क्रमणे' (३।१।१४) से पाप करने की इच्छा अर्थ में क्यङ् हुआ।

११. विसिन्वन्ति—यह षिञ् बन्धने स्वादि का रूप है। 'परिनिविभ्यः सेवसितसय—' (८।३।७०) से मूर्धन्य 'ष्' नहीं हो सकता, कारण कि सूत्र में 'सित' और 'सय' रूपों का ग्रहण किया है, षिञ् धातु का नहीं। 'सय' अच्प्रत्ययान्त है। वि+सयः=विषयः।

१२. भुवनप्रथितप्रख्यानाम्—यहाँ 'नाम्' के न् को ण् नहीं हुआ कारण कि चक्षिङ् के स्थान में जो ख्याञ् आदेश है वह वस्तुतः 'ख्शाञ्' है। 'श्'

१३. दुराचारस्य प्रणश्यति कीर्तिः, प्रणश्यति च वित्तम् ।
१४. यद्यपि नद्यां निस्नातोस्मि तथाप्यस्यां सरस्यां सिष्णासामि।

१५. प्रखरनखरैः प्रतिस्किरति व्याघ्रो मेषीम् ।
१६. त्रिहायनेयं पाठशाला कमप्यपूर्वं प्रकर्षं प्राप्तेति यत्सोऽस्या अध्यक्षस्य गुणः ।
१७. चतुर्हायणीयं कन्यकाऽष्टहायनीरपि कुमारीरतिशेते मेधया ।

१८. किं भोः सुसिक्तम् ? यथा तथा सुषिक्तं किं तवानेन ?

१९. यदत्र मेऽभिष्यात्तन्मे दातुमर्हसि, न ततोधिकं मार्गामि ।

के स्थान में जो 'य'—विधि है उसे असिद्ध काण्ड (८।२।१ से प्रारम्भ होने वाले) में पढ़ना चाहिये ऐसा भाष्यकार कहते हैं । अतः य् के असिद्ध होने से शकार द्वारा व्यवधान के कारण णत्व प्राप्त ही नहीं ।

१३. दुराचारस्य—यह बहुव्रीहि है । प्रणश्यति—यहाँ 'उपसर्गादसमासे—' (८।४।१४) से णत्व हुआ ।

१४. निस्नातः=नितरां स्नातः । यहाँ कौशल अर्थ न होने से 'निनदीभ्यां—' (८।३।८९) से षत्व नहीं हुआ । सिष्णासामि—यहाँ 'आदेश-प्रत्यययोः' (८।३।५९) से षत्व हुआ और तन्निमित्तक णत्व भी । ष्णा शौचे ऐसा पाठ होने से 'स्ना' षोपदेश है ।

१५. प्रतिस्किरति—यहाँ 'हिंसायां प्रतेश्च' (६।१।१४१) से हिंसा विषय में कॄ को सुट् का आगम होता है । और विक्षिपन् हिनस्ति (=दारयति) अर्थ होता है ।

१६. त्रिहायना—त्रीणि हायनान्यस्या इति । यहाँ न तो णत्व की प्राप्ति है और न ङीप् की ।

१३. दुराचारी की कीर्ति नष्ट होती है और धन भी ।
१४. यद्यपि मैं नदी में खूब नहा चुका हूँ तथापि इस झील में स्नान करना चाहता हूँ ।
१५. तीक्ष्ण नखों से व्याघ्र भेड़ को फैंक कर घायल करता है ।
१६. (केवल) तीन वर्ष पुरानी इस पाठशाला ने जो इतनी उन्नति की है यह इसके अध्यक्ष की बड़ाई है ।
१७. यह चार बरस की लड़की आठ बरस की लड़कियों से स्मृतिशक्ति में आगे निकल गई है ।
१८. क्यों जी अच्छी तरह सिंचाई कर दी? जैसे तैसे कर दी, तुझे इससे क्या ?
१९. जो इसमें मेरा हिस्सा हो, वह मुझे दीजिये । मैं उससे अधिक नहीं मांगता ।

---

१७. चतुर्हायणी—यहाँ 'दामहायनान्ताच्च' (४।१।२७) से ङीप् हुआ। यह ङीप् 'हायनो वयसि स्मृतः' इस वचन के अनुसार वयः (=अवस्था) अर्थ में ही इष्ट है, अन्यत्र नहीं । 'त्रिचतुर्भ्यां हायनस्य णत्वं वाच्यम्' इस वार्तिक से णत्व भी वयोवाचक 'हायन' को ही होता है ।

१८. सुसिक्तम्—यहाँ 'सुः पूजायाम्' (१।४।९४) से 'सु' की कर्मप्रवचनीय संज्ञा हुई और उपसर्ग संज्ञा का निषेध हो गया, सो षत्व न हुआ। 'पूजा' से यहाँ अभिप्राय धातुवाच्य क्रिया को अच्छी तरह करना है। सुषिक्तम्—यहाँ पूजा अर्थ न होने से उपसर्ग संज्ञा बनी रही, अतः षत्व भी हो गया ।

१९. अभिष्यात्—यहाँ अभि भाग अर्थ में प्रयुक्त हुआ है । अभिर्भागे (१।४।९१) से 'अभि' की कर्मप्रवचनीय संज्ञा लक्षण आदि अर्थों में तो होती है पर भाग अर्थ में नहीं । अतः भाग अर्थ में उपसर्ग संज्ञा बनी रही, और 'उपसर्गप्रादुर्भ्याम्—' (८।३।८७) से षत्व हो गया । कर्मप्रवचनीय न होने से द्वितीया भी नहीं हुई । सम्बन्धमात्र में षष्ठी (मे) हुई । मार्गामि—मार्ग् चुरादि है और आधृषीय है। 'आ धृषाद्वा' इस गणसूत्र से विकल्प से णिच् होता है । पक्ष में मार्गयामि भी होगा ।

२०. इदं सर्पिः इदं च सर्पिष्टरम्। कुत इदं वेत्थ?
२१. इदं पयः, इदं च पयस्पाशम् इति कुतो विवेकः?
२२. अवस्तब्धो वृषलः शीतेन।
२३. प्रातःकल्पा शर्वरीति प्रस्थेयं नः। कालसङ्गः परिहार्यः।

२४. परस्लक्षेषु मनुष्येषु कश्चिदेवात्मोपलब्धये यतते।
२५. महामहिमानस्तेऽन्तःस्थान् बहिःस्थांश्च रिपून् सममभिष्णुः।

२६. प्राङ्गने खेलन्ति बालाः सांराविणं च कुर्वन्ति।
२७. फाल्गुने मैत्रो विधिवद् दारान् करिष्यति।
२८. तत्र तटिनीतीरे सर्वं नीरवं निस्पन्दं चासीदिति भीराविशन्नः।

---

२०. सर्पिष्टरम्—सर्पिरन्तराच्छ्रेयः सर्पिः, दूसरे घी से बढ़िया घी। यहाँ तरप् प्रत्यय है। 'ह्रस्वात्तादौ तद्धिते' (८।३।१०१) से स् को मूर्धन्य ष् हुआ।

२१. पयस्पाशम्—यहाँ 'याप्ये पाशप्' (५।३।४७) से निन्दा अर्थ में पाश(प्) प्रत्यय हुआ। याप्यं निन्दितं पयः =पयस्पाशम्। 'सोऽपदादौ' (८।३।३८) से विसर्ग को स् होता है।

२२. अवस्तब्धः—यहाँ अव उपसर्ग होने पर भी 'स्' को मूर्धन्य नहीं हुआ, क्योंकि 'अवाच्चालम्बनाविदूर्ययोः' (८।३।६८) से आलम्बन और सामीप्य अर्थों में ही मूर्धन्यादेश का विधान है।

२३. प्रातःकल्पा =ईषदूनं प्रातः। कल्पप् स्वार्थिक प्रत्यय है और स्वार्थिक प्रत्यय 'स्वार्थिकाः प्रकृतितो लिङ्गवचनान्यतिवर्तन्तेऽपि' इस वचन के अनुसार प्रकृति के लिङ्ग वचन को छोड़ भी देते हैं। अतः यहाँ शर्वरी के लिङ्ग के अनुसार स्त्रीत्व हुआ। सोऽपदादौ (८।३।३८) से जो विसर्जनीय को सकारादेश प्राप्त हुआ वह 'सोऽपदादावित्यनव्ययस्येति वक्तव्यम्' इस वचन से रुक गया, कारण कि 'प्रातर्' अव्यय है। नः—यहाँ 'कृत्यानां कर्तरि वा'

२०. यह (अच्छा) घी है और यह बढ़िया (घी) है। यह कैसे जानते हो?
२१. यह दूध है और यह निकम्मा दूध है, यह कैसे विवेक करते हो?
२२. शूद्र (बेचारा) सर्दी के मारे अकड़ गया है।
२३. लगभग सुबह होगई है, अतः हमें चलना चाहिये। देर नहीं करनी चाहिये।
२४. लाखों मनुष्यों में कोई एक आत्मज्ञान के लिये यत्न करता है।
२५. परम महिमा को प्राप्त हुए वे लोग एक समान अन्दर और बाहिर के शत्रुओं का अभिभव कर सकते हैं।
२६. बालक आंगन में खेलते हैं और ऊधम मचाते हैं।
२७. फाल्गुन में मैत्र विधिपूर्वक विवाह करेगा।
२८. वहाँ नदी के तट पर सब शान्त और निश्चल था, इसलिये हमें भय आगया।

(२।३।७१) से षष्ठी हुई।

२४. लक्षात्परे परस्लक्षाः। 'पारस्करप्रभृतिराकृतिगणः' इस काशिका के वचन के अनुसार टित् होने से लक्ष शब्द के आदि में सुट् हुआ। सो 'स्' यहाँ पदान्त नहीं, अतः रुत्व की प्राप्ति नहीं।

२५. अभिष्युः=अभिभवेयुः। अस् का विधिलिङ् में रूप है। अभि उपसर्ग है। अतः षत्व हुआ। उपसर्ग के कारण ही धातु सकर्मक हो गई, जिस से रिपु शब्द से द्वितीया आई।

२६. प्राङ्गने—यहाँ 'कृत्यचः' (८।४।२९) से जो णत्व प्राप्त था उस का 'इजादेः सनुमः' (८।४।३२) इस नियम से निषेध हो गया।

२७. विधिवत्=विध्यर्हम्=यथाविधि। यहाँ 'तदर्हम्' (५।१।११७) से वति प्रत्यय हुआ। दारान् करिष्यति=विवाह करेगा। दारकर्म, दारक्रिया विवाह के नाम हैं।

२८. निस्पन्दम्—यह निः स्पन्द था, 'खर्परे शरि वा विसर्गलोपो वाच्यः' इस वार्तिक से विकल्प से विसर्ग का लोप होता है। 'निष्पन्द' रूप नहीं बन सकता।

२९. वह्वाम्पीमानि तडागानीति नावगाह्यान्यनाविकेन ।

३०. पोषकृतं पूषणं पोषं रयीणां नित्यमनुनाथामः ।

३१. प्राक्तनं जन्मानभ्युपेयिवांसो यूयं तावद् ब्रूत ईश्वरे वैषम्य-नैर्घृण्ये कुतो न स्याताम् ।

३२. भगवान्भूतभावनः स्वेन सामर्थ्येनैव द्विपदोऽभावयच्चतुष्पदश्च ।

३३. नियते ! त्वमेव वद निर्घृणे ! किमित्याजन्म दारिद्र्यस्वख एव विनिर्मितोस्मि ।

३४. एतयोरेकतरं पुस्तकं मे देहि । निरूढकार्यस्त्वरितं प्रत्यर्पयिष्ये ।

३५. आर्येतराणां मिथः कलहाः किंकृता इति न न विदितं प्राकृतस्यापि ।

३६. आर्येतरेषां वेदेऽधिकारो नाभ्यनुज्ञातः । तत्र कारणेन गुरुणा भवितव्यम् ।

---

२९. वह्वाम्पि =वह्वय आपोऽत्रेति बहुव्रीहिः । यहाँ समासान्त शास्त्र के अनित्य होने से 'ऋक्पू—' (५।४।७४) से प्राप्त 'अ' समासान्त नहीं हुआ । इस रूप की साधुता के विषय में काशिका (६।४।११) देखो ।

३०. अनुनाथामः—यहाँ 'आशिषि नाथः' इस वार्तिक नियम से परस्मपद हुआ । नाथृ नाधृ दोनों ही आत्मनेपदी पढ़ी हैं ।

३१. उपेयिवांसः—यह क्वसु प्रत्ययान्त है । 'उपेयिवाननाश्वाननूचानश्च' (३।२।१०९) से निपातन किया गया है ।

३२. भूतभावनः =भूतानि भावयति =उत्पादयति इति । एयन्त भावि धातु से कर्ता में ल्यु प्रत्यय हुआ है ।

२९. इन तालाबों में बहुत जल है अतः जो नाविक नहीं उसे इन में प्रवेश नहीं करना चाहिये।

३०. पुष्टि करने हारे पूषा देव से हम नित्य ही धन की पुष्टि (=पुष्कल धन) चाहते हैं।

३१. पूर्व जन्म को न मानने वाले आप जरा बताइये ईश्वर में विषमता (=पक्षपात) तथा निर्घृणता (क्रूरता) क्योंकर न होगी।

३२. भगवान् विधाता ने अपनी शक्ति से ही दोपायों और चौपायों को बनाया।

३३. हे निर्दय दैव तू ही बता, मैं जन्म से ही दरिद्रता का साथी क्यों बनाया गया हूँ।

३४. इन दो में कोई एक पुस्तक मुझे दे दो। (अपना) काम करके जल्दी ही लौटा दूंगा।

३५. आर्यों तथा आर्येतर लोगों के परस्पर झगड़े कौन कराता है यह रथ्यापुरुष भी जानता है।

३६. आर्येतर अर्थात् अनार्यों को वेद में अधिकार नहीं दिया गया है। इस में कोई बड़ा कारण होना चाहिये।

---

३३. दारिद्र्यसखः=दारिद्र्यस्य सखा। 'राजाहःसखिभ्यष्टच्' (५।४।९१) से टच् समासान्त हुआ।

३४. एकतरम्—'एकतरात्प्रतिषेधः' इस वार्तिक से अम् के स्थान में अद्ड् आदेश न हुआ।

३५. आर्येतराणाम्—आर्याश्च इतरे च तेषाम्। यह द्वन्द्व समास है। और 'द्वन्द्वे च' (१।१।३१) से द्वन्द्व समास में सर्वादि की सर्वनाम संज्ञा नहीं होती। अतः सुट् न होकर नुट् हुआ।

३६. आर्येतरेषाम्—आर्येभ्य इतरे, तेषाम्। यहाँ तत्पुरुष समास में इतर शब्द की सर्वनाम संज्ञा बनी रही, सो सुट् होकर आर्येतरेषाम् रूप सिद्ध हुआ।

३७. य इमेऽन्तरायां पुरि वसन्ति ते निष्ट्याः।
३८. द्वये वा प्राजापत्या देवाश्चासुराश्च। द्वेधा च प्रवृत्तिर्द्वयानाम्।

३९. गुरो! यदत्र मयकाऽजानता कृतं तन्मर्षितुमर्हसि।
४०. भयङ्करेयं मूर्त्तिर्दृष्टमात्रा लोमानि मे हर्षयति।
४१. पत्नी नाम गृहपत्नी। एतत्तन्त्रं हि गृहतन्त्रम्।

४२. पापेयं नापिती। इयं हि यत्र तत्र विग्राहयति लोकान्।
४३. ह्रीनिषेवाः कुलाङ्गनाः पादार्पितेक्षणा यान्ति परपुरुषदर्शनं परिहरन्त्यः।
४४. इयं जरती, इयं च युवतिः। तथापि पूर्वा वपुष्मती सर्वदोषमुक्ता च। अपरा कृशा तुन्दपरिमृजा च।
४५. आश्चर्यं यन्नेयमुक्तिरस्माकं श्रुतेर्गोचरः पुराऽभूत्। तेनैतां सहसा प्रत्येतुं न पारयामः।

---

३७. अन्तरायाम् =बाह्यायाम्। यहाँ 'अन्तरं बहिर्योगोपसंव्यानयोः' (१।१।३६) से अन्तर शब्द की सर्वनाम संज्ञा प्राप्त थी, पर 'अपुरीति वक्तव्यम्' इस वार्तिक से रुक गई। निष्ट्याः—'अव्ययात्त्यप्' (४।२।१०४) और गणसूत्र 'निसो गते' से 'निस्' से त्यप् प्रत्यय हुआ। निर्गतो वर्णाश्रमेभ्य इति निष्ट्यश्चण्डालादिः।

३८. द्वये—जस् परे होने पर 'प्रथमचरमतय—'(१।१।३३) से विकल्प से द्वय (=द्वितय) की सर्वनाम संज्ञा हुई। यह अप्राप्त विभाषा है। तयप् प्रत्ययान्त का सर्वादि गण में पाठ नहीं। इस तयप् के स्थान में 'द्वित्रिभ्यां तयस्यायज्वा' (५।२।४३) से विकल्प से अयच् आदेश होता है। द्वयानाम्— यहाँ वैकल्पिकी सर्वनाम संज्ञा भी प्राप्त नहीं, वह तो जस् परे ही होती है।

३९. मयका=कुत्सितेन मया। मुझ नाचीज़ ने। यहाँ अकच् प्रत्यय हुआ है।

४०. भयङ्करा—भयङ्कर शब्द खच्-प्रत्ययान्त है, अतः स्त्रीत्व में टाप्

३७. ये जो बाहिर के नगर में रहते हैं वे चाण्डाल हैं।

३८. देवता और असुर दोनों प्रजापति की सन्तान हैं। दोनों की (जुदा-जुदा) दो प्रकार की प्रवृत्ति है।

३९. गुरु जी, यहां जो मैं ने बेसमझी से किया उसे क्षमा करें।

४०. यह भयङ्कर मूर्त्ति देखते ही मेरे रोंगटे खड़े हो जाते हैं।

४१. पत्नी निश्चय ही घर की स्वामिनी है। घर का धन्धा इसी के अधीन है।

४२. यह दुष्ट नाइन है। यह जहाँ तहाँ लोगों को लड़वा देती है।

४३. लज्जाशील कुलीन स्त्रियाँ परपुरुष के दर्शन से बचती हुई अपने चरणों में दृष्टि लगाये चलती हैं।

४४. यह बुढ़िया है और यह युवति। तो भी पहली सबल शरीर वाली और नित्य उद्योगिनी और दूसरी दुबली और सुस्त।

४५. आश्चर्य की बात है कि यह वाक्य हम ने पहले कभी नहीं सुना। इसलिये हम इसे एकदम समझने में असमर्थ हैं।

हुआ, ङीप् नहीं।

४१. गृहपत्नी—गृहस्य पतिः स्वामिनी। यहाँ 'विभाषा सपूर्वस्य' (४।१।३४) से विकल्प से 'पति' के 'इ' को 'न्' और ङीप् प्रत्यय होता है। पक्ष में 'गृहपतिः' भी कह सकते हैं।

४२. पापा—यहाँ पाप शब्द से 'अर्श आदिभ्योऽच्' (५।२।१२७) से अच् प्रत्यय होता है। पापमस्या अस्तीति पापा।

४३. पादाभिवीक्षणाः—यहाँ ईक्षण (=आँख) बह्वच् है, अतः 'स्वाङ्गाच्चोपसर्जनात्—' (४।१।५४) से जो पाक्षिक ङीष् की प्राप्ति थी वह 'न क्रोडादिबह्वचः' (४।१।५६) से रुक गई।

४४. तुन्दपरिमृजा=तुन्दं परिमार्ष्टि। 'तुन्दशोकयोः परिमृजापनुदोः' (३।२।५) से क प्रत्यय हुआ।

४५. गोचरः—यह घप्रत्ययान्त है और घप्रत्ययान्त नियम से पुंल्लिङ्ग होते हैं। ऐसे शब्द अजहल्लिङ्ग कहलाते हैं।

४६. उषः। चिरायुर्भूयाः, सुखं च जीव्याः।
४७. फलाभिलाषो हि प्रायेण प्रयोजयति प्रवृत्तिं लौकिकीं वैदिकीं च।
४८. इयं क्षीरपा क्षत्रिया, इयं सुरापी। अतो भिद्येते इमे शीलेन।

४९. महात्मानं दर्शका जना नानादिग्देशेभ्यः संनिपतन्ति।

५०. दुर्बलाः प्रबलेभ्यो नमस्कुर्वन्ति शिष्टाश्च दुष्टेभ्यः।
५१. को नाम सुधीश्चलाचलेभ्यः प्राणेभ्यः प्रति मानं यच्छेत् ?
५२. देवदत्तोऽधीती व्याकरणे, आम्नाती च च्छन्दसीति धन्यतमः पुंसाम्।
५३. ब्रह्मैव जगद्रूपेण परिणमत इत्याहुरविद्वांसः।

---

४६. चिरायुः=चिरमायुरस्याः। यहाँ किसी भी स्त्रीप्रत्यय की प्राप्ति नहीं।

४७. लौकिकीम्—लोके विदितो लौकिकः। 'लोकसर्व लोकाट्ठञ्'(५।१।४४) से ठञ् प्रत्यय हुआ। अथवा 'अध्यात्मादिभ्यश्च' इस वार्तिक से 'तत्र भवः' इस अर्थ में ठञ् प्रत्यय हुआ। वेदे भवः =वैदिकः। यहाँ भी इसी वार्तिक से ठञ् समझना चाहिये।

४८. क्षीरपा—क्षीरं पिबतीति। 'आतोऽनुपसर्गे कः' (३।२।३) से 'क' प्रत्यय होकर स्त्रीत्व विवक्षा में टाप् हुआ। सुरापी—'गापोष्टक्' (३।२।८), तथा 'सुराशीध्वोः पिबतेरिति वक्तव्यम्' इस वार्तिक से टक् प्रत्यय होता है। टक् टित् है, अतः स्त्रीप्रत्यय ङीप् हुआ।

४९. दर्शकाः—द्रक्ष्यन्तीति दर्शकाः। भविष्यत् काल में ण्वुल् हुआ है। अतः 'अकेनोर्भविष्यदाधमर्ण्ययोः' (२।३।७०) से कृद्योगलक्षणा षष्ठी का निषेध होकर अनुक्त कर्म 'महात्मन्' से द्वितीया हुई।

४६. हे (पुत्री) उषा तू आयुष्मती हो और सुखपूर्वक जीओ।

४७. प्रायः फल की इच्छा ही (मनुष्य) को लौकिक व वैदिक कर्मों में प्रवृत्त कराती है।

४८. यह क्षत्रिया दूध पीती है और यह सुरा। अतः दोनों के स्वभाव में भेद है।

४९. महात्मा को देखने के लिये लोग नाना दिशाओं और देशों से एकत्रित हो रहे हैं।

५०. दुर्बल बलवानों को नमस्कार करते हैं और शिष्ट दुष्टों को।

५१. कौन बुद्धिमान् (इन) अस्थिर प्राणों के बदले मान को खो दे?

५२. देवदत्त ने व्याकरण पढ़ा है और वेदाभ्यास किया है इससे वह मनुष्यों में सबसे अधिक भाग्यवान् है।

५३. ब्रह्म ही स्वयं जगद्रूप में परिणत हो गया है ऐसा मूर्खों का कथन है।

---

५०. प्रबलेभ्यः—प्रबलाननुकूलयितुम्=बलवानों को अपने अनुकूल करने के लिये। यहाँ 'क्रियार्थोपपदस्य च कर्मणि स्थानिनः' (२।३।१४) से स्थानी (=अप्रयुक्त, गम्यमान) 'अनुकूलयितुम्' का कर्म होने से 'प्रबल' से चतुर्थी हुई।

५१. चलाचलेभ्यः—चलन्तीति चलाचलाः। 'नन्दिग्रहि—'(३।१।१३४) में 'चरिचलिपतिवदीनां वा द्वित्वमाक् चाभ्यासस्य' इस वार्तिक से अच् प्रत्यय होकर द्वित्व हुआ और अभ्यास को आक् का आगम हुआ। प्राणेभ्यः—यहाँ 'प्रति' के कर्मप्रवचनीय होने से 'प्रतिनिधिप्रतिदाने च यस्मात्' (२।३।११) से पञ्चमी हुई।

५२. अधीतमनेन इत्यधीती। आम्नातमनेन इत्याम्नाती। 'इष्टादिभ्यश्च' (५।२।८८) से इनि प्रत्यय हुआ और 'क्तस्येन्विषयस्य कर्मण्युपसंख्यानम्' इस वार्तिक से कर्म में सप्तमी हुई।

५३. परिणमेत—यहाँ कर्मकर्ता में 'न दुहस्नुनमां यक्चिणौ' (३।१।८९) से यक् का प्रतिषेध हो गया। आत्मनेपद तो होता है।

५४. तनुरियं ते तनुरसहिष्णुरातपम् । तेन मुहूर्तं प्रच्छायशीतलेऽस्मिंस्तरुतले विश्रमयाऽऽत्मानम् ।

५५. दूरक्षाः स्त्रिय इति न तासां जन्मन्युत्सवो भवतीति केचिदुत्प्रेक्षन्ते ।

५६. सहोदरा इव परस्परं प्रीतिमन्तः परस्परमनुव्रताश्च लोका अभ्युदयन्ते ।

५७. प्रायेण पापो दुर्गतो जनः स्वं कर्मानुपालभ्य परिमृष्यति दैवाय ।

५८. स्यन्दन्ते सरितः सागराय न च सर्वाः समुद्रगा भवन्ति ।

५९. महीं क्षियतीति महीक्षिद्राजोच्यते इति केचित् । तन्न । मह्याः क्षयति ईष्ट इति महीक्षित् इति तु वक्तव्यम् ।

६०. एते हि तीर्थध्वाङ्क्षा नैकत्र शक्नुवन्ति चिरं स्थातुम् ।

---

५४. असहिष्णुः—सह् से ताच्छील्य अर्थ में इष्णुच् प्रत्यय हुआ है । इस कृत्प्रत्यय के योग से षष्ठी प्राप्त थी, उस का 'न लोकाव्ययनिष्ठाखलर्थतृनाम्' (२।३।६९) से निषेध हो गया ।

५५. दूरक्षाः—खलप्रत्ययान्त है । कृच्छ्रेण रक्ष्याः ।

५६. अभ्युदयन्ते—यह अभिउद्-पूर्व अय् का प्रयोग है । अय् भ्वादिगण की आत्मनेपदी धातु है ।

५७. परिमृष्यति—मृष् दिवा० उभयपदी है पर 'परेर्मृषः' (१।३।८२) से परिपूर्वक का प्रयोग परस्मैपद में ही होता है । परिमृष्यति=असूयति, अतः क्रुधद्रुहेर्ष्यासूयार्थानां—' (१।४।३७) से दैव से चतुर्थी हुई ।

५४. यह तेरा सूक्ष्म शरीर धूप नहीं सह सकता। अतः क्षणभर इस घनी छाया वाले शीतल वृक्ष के नीचे आराम कर लो।

५५. स्त्रियों की रक्षा करनी कठिन है, अतः उनके जन्म पर हर्ष नहीं होता, ऐसी कई लोग तर्कणा करते हैं।

५६. सगे भाइयों की तरह आपस में प्रीति रखने वाले और एकदूसरे में भक्ति रखने वाले लोग अभ्युदय को प्राप्त होते हैं।

५७. प्रायः पापी दुर्गति को प्राप्त कर अपने कर्म को दोष न देकर दैव पर क्रोध करता है।

५८. नदियाँ समुद्र की ओर बहती हैं, पर सभी समुद्र में पहुँचती नहीं।

५९. मही (पृथिवी) पर निवास करता है इस लिये राजा महीक्षित् कहलाता है ऐसा कई विद्वान् कहते हैं। सो ठीक नहीं। मही का ईश होने से वह महीक्षित् होता है ऐसा कहना चाहिये।

६०. ये तीर्थ के कौओं की तरह चञ्चल हैं, बहुत देर तक एक जगह नहीं ठहर सकते।

---

५८. सागराय=सागरं गन्तुम्। 'क्रियार्थोपपदस्य च कर्मणि स्थानिनः' (२।३।१४) से चतुर्थी हुई।

५९. महीम्—क्षि निवासगत्योः, यह तुदादि धातु अकर्मक है, तो भी 'देशकालाध्वगन्तव्याः कर्मसंज्ञा ह्यकर्मणाम्' से मही की कर्म संज्ञा हुई। ऐसी व्युत्पत्ति अमरकोष के टीकाकार प्रसिद्ध विद्वान् क्षीर स्वामी ने की है। पर यह अर्थासंगति के कारण ठीक नहीं। वस्तुतः यहाँ वैदिक शासनार्थक क्षि धातु है जिस के प्रयोग में षष्ठी विभक्ति देखी जाती है। सेदु राजा क्षयति चर्षणीनाम् (ऋ० १।३२।१५)।

६० तीर्थध्वाङ्क्षाः=तीर्थे ध्वाङ्क्षा इव। यहां क्षेप (=निन्दा) अर्थ में ध्वाङ्क्षेण क्षेपे (२।१।४२) से सप्तमी समास हुआ।

६१. यो हि विरक्तो नाम भूत्वा स्वेष्वनुरज्यते स लोकमति-सन्धत्ते ।

६२. वध्वा नवे वाससी परिधाप्य तां विवाहमण्डपे संनिधापयन्ति ऋत्विजः ।

६३. न खलु व्याकरणस्याऽभिज्ञोऽसि यदेवमन्यथा व्युत्पादयसि पदानि मिथ्या च कारयसे ।

६४. क्षुद्रैराचरित एष पन्थाः । तस्मादिमं माऽऽस्थाः ।

६५. तरुफलशातनान्निषिद्धा दुर्वृत्ता अमी वटवो न चापलं विरमयन्ति ।

६६. अनूबन्धं विजानन्नहमेतदकरवम् अतो नानुशये ।

६७. यदि कल्पे कलितो कश्चिद् गृह्योक्तानि कर्माणि संशोधयेत्संक्षिपेच्च तदा लोकस्यानल्पमुपकुर्यात् ।

---

६१. नाम—यहाँ नाम अव्यय है और इसका अर्थ है अलीक, मिथ्या। अनुरज्यते=स्वयमेव अनुरक्तो भवति । 'कुषिरञ्जोः प्राचां श्यन्परस्मैपदं च' (३।१।९०) से कर्मकर्ता में पूर्वाचार्यों के मत में कुष् तथा रञ्ज् धातुओं से परस्मैपद और श्यन् प्रत्यय होता है। पक्ष में आत्मनेपद और यक् भी होता है।

६२. वध्वा—यहाँ परिपूर्वक ण्यन्त धाञ् धातु के प्रयोग में अण्यन्तावस्था के कर्ता 'वधू' की कर्मसंज्ञा किसी भी शास्त्र से प्राप्त नहीं, अतः अनुक्त कर्ता में तृतीया हुई । सूत्र ग्रन्थों में जो द्वितीया का प्रयोग देखा जाता है, सो अपाणिनीय है ।

६३. व्याकरणस्य—यहाँ व्याकरण से कृद्योग-लक्षणा षष्ठी हुई है। 'अभिज्ञः'—यहाँ 'आतश्चोपसर्गे' (३।१।१३६) से कप्रत्यय हुआ है । मिथ्या कारयसे—यहाँ 'मिथ्योपपदात्कृञोऽभ्यासे' (१।३।७१) से ण्यन्त 'कारि' धातु से आत्मनेपद का नियम किया गया है । 'णिचश्च' से जो कर्त्रभिप्राय

६१. जो विरक्त होने का बहाना बना कर अपनों में अनुरक्त रहता है वह दूसरों को धोखा देता है।

६२. वधू को नये वस्त्र पहना कर ऋत्विक् लोग उसे विवाह मण्डप में उपस्थित करते हैं।

६३. तुम्हें व्याकरण का ज्ञान नहीं, जो तुम इस प्रकार उलटी-पुलटी पदों की व्युत्पत्ति करते हो और बार-बार इन का अशुद्ध उच्चारण करते हो।

६४. इस मार्ग पर क्षुद्र लोग चलते हैं, तू इसका आश्रयण मत कर।

६५. वृक्षों के फलों को गिराने से रोके हुए भी ये दुर्वृत्त ब्रह्मचारी चञ्चलता नहीं छोड़ते।

६६. परिणाम को जानते हुए ही मैंने ऐसा किया, अतः मुझे इस का दुःख नहीं।

६७. यदि कोई कल्प सूत्रों को जानने वाला गृह्यसूत्रोक्त कर्मों में संशोधन कर उन्हें संक्षिप्त कर दे तो संसार का बहुत बड़ा उपकार करे।

क्रियाफल में आत्मनेपद की विधि थी, वह बार-बार अशुद्ध उच्चारण अर्थ में अकर्त्रभिप्राय फल में भी होगी।

६४. माऽऽस्थाः—आङ् पूर्वक स्था का लुङ् में रूप है, माङ् उपपद है। आ स्था का 'आश्रयण' अर्थ है।

६५. शातनात्—णिच् परे शद् के 'द्' को 'त्' होता है। जब गति अर्थ न हो। 'शदेरगतौ तः' (७।३।४२)। शादयति गाः =गौओं को हाँकता है।

६६. अनूबन्धम्—'उपसर्गस्य घञि—'(६।३।१२२) से उपसर्ग को दीर्घ हुआ है। ऐसा ही प्रासादः, परीहारः, प्राकारः, अपामार्गः इत्यादि में दीर्घ होता है। अनुशये—अनुपूर्वक शीङ् का अर्थ 'पछताना' है।

६७. कल्पे कलिती=कल्पं गृहीतवान् विज्ञातवान्। 'कलित्रखी कामधेनू' इस वचन से √कल् के नाना अर्थ हैं।

६८. एधानाहारको ग्रामीणा वनानि प्रस्थिताः ।

६९. कौसल्यायां रामो जातः, सुमित्रायां च लक्ष्मणः, तथाविधं च तयोः सौभ्रात्रमिति चित्रीयते लोकः ।

७०. रजकाय वस्त्राणि ददातीमानि निर्णिज्य रज्यन्तामिति ।

७१. माठरकौण्डिन्यौ ब्राह्मणानिमान् भोजनेन परिवेविषाताम् ।

७२. पश्य कियता यत्नेन सशर्करमिदं क्षेत्रं कृषति कृषीवलो हलेन ।

७३. पितरि शुश्रूषितव्यं मातरि शुश्रूषितव्यम् ।

७४. खड्गी वाणी शरासनी स राजा प्रातस्तरामेवाखेटं निर्जगाम ।

---

६८. एधानाहारकाः=एधानाहरिष्यन्ति । 'अकेनोर्भविष्यत्—' से कृद्योग-लक्षणा षष्ठी का निषेध होकर 'एध' से अनुक्त कर्म में द्वितीया हुई ।

६९. सौभ्रात्रम्—शोभनोऽस्येति सुभ्राता । 'वन्दिते भ्रातुः' (५।४।१५७) से समासान्त (कप्) का निषेध हुआ । सुभ्रातुर्भावः =सौभ्रात्रम् । 'हायनान्त-युवादिभ्योण्' (५।१।१३०) से भाव (अथवा कर्म) में अण् प्रत्यय हुआ ।

७०. रजकाय—यहाँ रजक शब्द से सम्प्रदान में चतुर्थी हुई । भाष्य के अनुसार 'स्वस्वत्वनिवृत्तिपूर्वकं परस्वत्वापादनं दानम्' (इस प्रकार देना कि अपना स्वामित्व हटा कर दूसरे को स्वामी बना देना) ही दान नहीं । जैसे भी दिया जाय, जिसे दिया जाय वह सम्प्रदान है । अतः भाष्यकार का 'खण्डिकोपाध्यायः शिष्याय चपेटां ददाति' यहाँ शिष्य शब्द से चतुर्थी का प्रयोग संगत होता है । मतान्तर में रजक से शैषिकी षष्ठी होगी ।

७१. ब्राह्मणान्भोजनेन—यहाँ परिपूर्वक 'विष्लृ व्याप्तौ' इस धातु के प्रयोग में 'भोजन' से तृतीया हुई और जिन्हें भोजन परोसा गया है उन के वाचक ब्राह्मण शब्द से द्वितीया । ऐसा ही प्रायः शिष्ट व्यवहार है । इस विषय में हमारी कृति 'शब्दापशब्दविवेकः' की भूमिका पृ० ३२ देखो । महाभारत आदि पर्व (३।९७) में भी 'ब्राह्मणान्परिवेष्टुमिच्छामि' ऐसा प्रयोग

६८. इंधन लाने के लिये ग्रामवासी जंगलों को चल पड़े।
६९. राम का कौसल्या से जन्म हुआ, लक्ष्मण का सुमित्रा से, इन दोनों का ऐसा सुन्दर भ्रातृभाव यह देख कर लोग विस्मित होते हैं।
७०. धोबी को वस्त्र देता है इसलिये कि इन्हें धो कर रंग दे।
७१. माठर और कौण्डिन्य इन ब्राह्मणों को भोजन परोसें।
७२. देखो कितने यत्न से किसान इस कंकरीले खेत में हल चला रहा है।
७३. पिता की सेवा करनी चाहिये, माता की सेवा करनी चाहिये।
७४. खड्ग, बाण और धनुष् लिये हुए वह राजा बहुत सवेरे शिकार के लिये निकल गया।

आया है। तथा सभापर्व (४९।३१) में 'पूर्णे शतसहस्रे तु विप्राणां परिविष्यताम्' (=परिविष्यमाणानाम्) ऐसा प्रयोग मिलता है।

७२. कृषति—कृष विलेखने, यह भ्वादि भी है और तुदादि भी। पर हल द्वारा कृषि कर्म में तुदादि कृष् का ही प्रयोग होता है।

७३. पितरि—यहाँ कर्मत्व की अविवक्षा करके भाष्यकार ने अधिकरणत्व की विवक्षा में सप्तमी का प्रयोग किया है। अधिकरणत्व की विवक्षा में क्या हेतु हो सकता है? सन्नन्त शुश्रूष का मूल अर्थ सुनने की इच्छा करना है, इस क्रिया की सिद्धि किसी के समीप बैठ कर ही हो सकती है, अतः पितृ, मातृ शब्दों से सामीपिक अधिकरण में सप्तमी हुई। प्राचीन रीति के अनुसार शास्त्रादि श्रवण का पात्र वही था जो सेवा करता था। अतः शुश्रूषा का अर्थ सेवा हो गया।

७४. आखेटम्—निर् पूर्वक गम् (निकलना) अकर्मक है। निर्जगाम =उद्दिश्य निर्जगाम। इस 'उद्दिश्' का कर्म होने से आखेट में द्वितीया हुई। ऐसे ही 'नगरं प्रतिष्ठते' में नगर से द्वितीया हुई। इस पर पुराने आचार्यों का यह वचन है—अकर्मका अप्यन्तर्णीतक्रियान्तरा धातवः सकर्मका भवन्ति।

७५. विदेशस्थो देवदत्तश्चिरमदृष्टाया अम्बायाः संजानाति ।

७६. किमिति वेदनिन्दया न लज्जसे, गुरुजनापवादेन वा नापत्रपसे ?

७७. मदनपरवशाऽपि नात्मनः प्रभवामि । जनको हि ममेष्टेऽस्य शरीरस्य ।

७८. रात्रौ रोचमान इन्दुः कस्य न प्रियः ।

७९. अत्र भवान्साधु सन्दभति वाक्यानीति जिज्ञासे केनात्र कर्मण्यभिविनीतोस्ति ।

८०. उदीयन्तेऽस्य पुण्यानि । यस्माद् यदयं प्रारभते तदेवास्य फलति ।

८१. यो हि स्वयं सूत्रं कृणत्ति वयति च स वर्धते पूयते च ।

८२. प्रतिरुद्धा आपः पूयन्ते ।

८३. शुक्तिं पश्यन्रजतमिति भ्रमति ।

---

७५. संजानाति=आध्यायति=उत्कण्ठा पूर्वक स्मरण करता है । 'अम्बा' से शैषिकी षष्ठी हुई ।

७६. वेदनिन्दया—यहाँ हेतु अर्थ में तृतीया समझनी चाहिये । तृतीया का व्यवहार ही शिष्ट-सम्मत है । जैसे भारत में प्रयोग है—अहो बत महत्कष्टं विपरीतमिदं जगत् । येनापत्रपते साधुरसाधुस्तेन तुष्यति ॥

७७. नात्मनः प्रभवामि—यहाँ अधिकार अर्थ में प्रपूर्वक भू का प्रयोग है । इस अर्थ में षष्ठी का व्यवहार ही शिष्ट सम्मत है । ममेष्टे (मम ईष्टे)—यहाँ 'अधीगर्थ—'(२।३।५२) से विकल्प से षष्ठी होती है । कर्मत्वविवक्षा में द्वितीया का प्रयोग साहित्य में न के बराबर है ।

७८. रोचमानः=दीप्यमानः । रुच दीप्तावभिप्रीतौ च । रुच् का दीप्ति अर्थ रुचि, रोचिस् (नपुं०) रोचिष्णु आदि में स्पष्ट है । न रुच्यर्थं किञ्चिद् धारयेत्=शोभा के लिये (ब्रह्मचारी) कुछ न पहने ।

७५. विदेश में रहता हुआ देवदत्त चिर से न देखी हुई माता को याद करता है।

७६. तुम वेदनिन्दा से क्योंकर नहीं लजाते, गुरुओं की निन्दा से भी तुम्हें लज्जा नहीं आती ?

७७. कामातुर होती हुई भी मुझ को अपने पर बस नहीं। मेरे पिता का इस मेरे शरीर पर अधिकार है।

७८. रात को चमकता हुआ चाँद किसे प्यारा नहीं लगता ?

७९. आप सुन्दर वाक्य-रचना करते हैं। मैं जानना चाहता हूँ कि आप को इस कर्म में किसने शिक्षा दी है।

८०. इसके पुण्यों का उदय हो रहा है, कारण कि जिस किसी कर्म को यह हाथ लगाता है वह इसका सिद्ध हो जाता है।

८१. जो स्वयं सूत कातता है और बुनता है वह बढ़ता है और पवित्र हो जाता है।

८२. रुका हुआ जल सड़ जाता है।

८३. सीपी को देख कर यह चान्दी है ऐसा भ्रम करता है।

---

७९. अत्र भवान्—यह समास नहीं। 'इतराभ्योपि दृश्यन्ते' (५।३।१४) से सप्तमी, पञ्चमी के अतिरिक्त प्रथमा आदि विभक्तियों से भी तसिल् आदि प्रत्यय हो जाते हैं। अत्र भवान्=अयं भवान्। ततो भवान्=स भवान्। तत्र भवते। ततो भवते।

८०. उदीयन्ते—यह ईङ् गतौ दिवादि का रूप है।

८१. कृणत्ति—यह कृती वेष्टने रुधादि का रूप है। कातने अर्थ में इसी का प्रयोग होता है, कृती छेदने तुदादि का नहीं।

८२. पूयन्ते—यह पूयी विशरणे का रूप है। विशरण झड़ना होता है, झड़ने से सड़ना उपलक्षित होता है।

८३. भ्रमति—भ्रान्त होने अर्थ में भ्वादि भ्रम् का ही प्रयोग इष्ट है, दिवादि का नहीं।

८४. मुहुर्मुहुर्विधवति माकन्दमञ्जरीः समीरः ।

८५. केयं भिक्षाव्यसनिनी कुलाटेति सोऽञ्जसाऽवेदीत् ।

८६. किमित्यज्ञवदनुकरोषि परेषाम् । सदसती विविच्य प्रवर्तस्व ।

८७. वसुमित्रोऽनवग्रहं ब्रूते न च विरमति, अप्रसक्तं च बहु भाषते ।

८८. एहि, आरामेऽत्रारमामः ।

८९. अयमाक्रीडः । अत्राक्रीडन्ते छात्रा विहरन्ति च लोका अहर्मुखे ।

९०. यो गुरून्नाभ्युत्तिष्ठति सोऽपध्वस्यते ।

९१. अस्माद् ग्रामाच्छतमुत्तिष्ठति । सोऽयमल्पीयानायः ।

९२. अयं लोकोऽर्थकामयोरासक्तो धर्मेपि नोत्तिष्ठते किमुतापवर्गे ।

---

८४. विधवति—धूञ् चुरा० आधृषीय है, अतः पक्ष में णिच् नहीं होता, केवल कर्तरि शप् होता है ।

८५. कुलाटा—स्वैरिणी अर्थ में शकन्ध्वादित्वात् पररूप एकादेश होकर 'कुलटा' रूप सिद्ध होता है । प्रकृत में वह अर्थ नहीं, अतः सवर्ण दीर्घ हो कर 'कुलाटा' रूप निर्दोष ठहरा ।

८६. परेषाम्—यहाँ शेषे षष्ठी हुई । कर्मत्व विवक्षा में द्वितीया भी हो सकती है । अनुकरोषि—यहाँ 'अनुपराभ्यां कृञः' (१।३।७९) से परस्मैपद ही होता है ।

८७. अवग्रहः =प्रतिबन्धः । अनवग्रहम् (क्रियावि०)=अनर्गलम् ।

८८. आरमामः—'व्याङ्परिभ्यो रमः' (१।३।८३) से परस्मैपद होता है ।

८९. आक्रीडन्ते— 'क्रीडोनुसंपरिभ्यश्च' (१।३।२१) में पूर्वसूत्र 'आङो दोऽनास्यविहरणे' (१।३।२०) से आङ् की अनुवृत्ति आती है । सो आङ्पूर्वक

८४. वायु आम्र-मञ्जरियों को बार-बार हिलोरे देता है।

८५. यह भीख माँगने वाली घर-घर घूमने वाली कौन है, यह उसने ठीक-ठीक जान लिया।

८६. मूर्खों की तरह दूसरों का अनुकरण क्यों करते हो? अच्छे बुरे का विवेक कर काम करो।

८७. वसुमित्र उच्छृङ्खलता से बोले जा रहा है और थमता नहीं। बहुत सी अप्रासङ्गिक बातें कह रहा है।

८८. आओ, इस बाग में रमण करें।

८९. यह उद्यान है। यहाँ दिन निकलते विद्यार्थी खेलते हैं और (दूसरे) लोग सैर करते हैं।

९०. जो गुरुओं को आते देखकर आसन से नहीं उठता, वह धिक्कारा जाता है।

९१. इस गाँव से १००) उठता है, सो यह बहुत थोड़ी आमदनी है।

९२. लोग अर्थ व काम में आसक्त हुए-हुए धर्माचरण में भी उद्यम नहीं करते, मोक्ष का तो क्या कहना।

क्रीड् से आत्मनेपद होता है।

९०. अभ्युत्तिष्ठति=अभिलक्ष्य उत्तिष्ठति। अभि उद् पूर्वक स्था सकर्मक है। इसी अर्थ में प्रति उद् पूर्वक स्था का भी प्रयोग होता है। प्रत्युत्थेया ब्राह्मणाः। अपध्वस्यते—अपपूर्वक ध्वंस् का अर्थ निन्दा करना, धिक्कारना है। उपसर्गवश यह सकर्मक है। वस्तुतः ध्वंस् का अर्थ गति भी है। अपपूर्वक इस का अर्थ 'दूर होना' होता है, पर अन्तर्भावितण्यर्थ होने से 'दूर करना' हो जाता है। जिसे धिक्कारा जाता है उसे दूर किया जाता है, इसलिये अपध्वंस् का अर्थ धिक्कारना हो गया।

९१. उत्तिष्ठति=उत्पद्यते=लभ्यते। यहाँ ईहा (=चेष्टा=यत्न) अर्थ न होने से उद् पूर्व स्था से आत्मनेपद नहीं हुआ।

९२. उत्तिष्ठते—यहाँ यत्न अर्थ होने से 'उदोनूर्ध्वकर्मणि' (१।३।२४) और उद ईहायामिति वक्तव्यम्—इस वार्तिक से आत्मनेपद हुआ।

९३. बहुरूपोऽसौ यस्य कस्यापि रूपमातिष्ठति स्वेच्छया, न च निपुणमीक्ष्यमाणोऽपि व्यक्तितः परिच्छिद्यते।

९४. अद्य संस्थास्यते यज्ञ इति प्रस्थास्यन्ते याज्ञिकाः।

९५. वर्षास्वयं सरोवरो जलधिमनुहरति, नाऽस्यावारपारे दृश्येते।

९६. सुहृदं देवदत्तमनुयोक्ष्ये ह्यो मद्गेहे किमिति नोपातिष्ठथा इति।

९७. विजये! जानीहि कः प्रतीहारमुपतिष्ठति।

९८. भोजनकाल उपतिष्ठसे कार्यकाले क यासि?

९९. श्यामः पितरि प्रतिकूलो मात्रा तु संजानीते।

१००. इह नगर्यां साधूपक्रामत्यातुरान् पीयूषपाणिर्ध्रुवसिद्धिर्नाम वैद्यः।

१०१, नवतन्त्रोऽयं भिषक् साधु चिकित्सत्यसाधु वेति विचिकित्सति जनः।

१०२. शतं मे धारयसि। यदि न सहसे दातुं मा दाः। अपजानीषे किम्?

---

९३. आतिष्ठति—यहाँ प्रतिज्ञा अर्थ न होने से 'आङः स्थः प्रतिज्ञाने' इस वार्तिक से आत्मनेपद न हो सका।

९४. संस्थास्यते—यहाँ समवप्रविभ्यः स्थः (१।३।२२) से आत्मनेपद हुआ। इसी से 'प्रस्थास्यन्ते' यहाँ भी आत्मनेपद हुआ।

९५. अनुहरति=अनुकरोति। यहाँ गतताच्छील्य (=चाल का अभ्यास) अर्थ न होने से 'हरतेर्गतताच्छील्ये' इस वार्तिक से आत्मनेपद की प्राप्ति नहीं। हाँ स्वरितञितः कर्त्रभिप्राये क्रियाफले (१।३।७२) से जो आत्मनेपद प्राप्त है उस का निषेध नहीं।

९६. अनुयोक्ष्ये—पूछूँगा। 'स्वराद्यन्तोपसर्गादिति वक्तव्यम्' इस वार्तिक से युज् से आत्मनेपद का नियम हो गया। युज् स्वरितेत् है। उपातिष्ठथाः—'अकर्मकाच्च' (१।३।२६) से आत्मनेपद होता है।

९३. वह बहुरूपिया है, जिस किसी का भी रूप चाहता है, धारण कर लेता है और अपने रूप से पहचाना नहीं जाता।

९४. आज यज्ञ समाप्त हो जायगा और याज्ञिक लोग चले जायेंगे।

९५. बरसात में यह तालाब समुद्र सा बन जाता है, इसका आर पार नहीं दीखता।

९६. मैं अपने मित्र देवदत्त से पूछूँगा कल आप मेरे घर क्यों नहीं आये?

९७. विजये! मालूम करो दर्वाजे पर कौन है।

९८. भोजन के समय उपस्थित हो जाते हो, काम के समय कहाँ चले जाते हो?

९९. श्याम पिता के प्रतिकूल है, पर माता के अनुकूल।

१००. इस नगर में अमृत-भरे हाथों वाला ध्रुवसिद्धि नाम का वैद्य है जो रोगियों की अच्छी तरह चिकित्सा करता है।

१०१. यह नौसिखिया वैद्य है, लोगों को सन्देह है कि यह ठीक चिकित्सा करता है अथवा नहीं।

१०२. तू ने मुझे सौ रुपया देना है, यदि नहीं दे सकता, मत दे। इन्कार क्यों करता है?

---

९७. उपतिष्ठति—यहाँ प्रतीहार (=द्वार) कर्म है, अतः आत्मनेपद की प्राप्ति नहीं।

९८. यहाँ भी (जैसे ९६वें में) उपपूर्वक स्था का अकर्मकतया प्रयोग है, अतः आत्मनेपद हुआ।

९९. संजानीते—यहाँ आध्यान (=उत्कण्ठा से याद करना) अर्थ नहीं, अतः 'सम्प्रतिभ्यामनाध्याने' (१।३।४६) से आत्मनेपद होता है।

१००. उपक्रामति—'उपपराभ्याम्' (१।३।३९) इस नियम से वृत्त्यादि अर्थों में ही उप, परा-पूर्वक क्रम् से आत्मनेपद होता है, किसी दूसरे अर्थ में नहीं।

१०१. विचिकित्सति—यहाँ सन्नन्त कित् से आत्मनेपद की प्राप्ति न होने से शेषात्कर्तरि परस्मैपदम् (१।३।७८) से परस्मैपद होता है।

१०२. अपजानीषे—अपह्नवे ज्ञः (१।३।४४) से आत्मनेपद होता है।

१०३. अयमध्ययनाय क्रमतेऽयं च खेलनाय। सहोदरावपीमौ विसदृशौ शीलेन।

१०४. राजान्नं तेज आदत्त इति पराकरोति राजप्रतिग्रहं द्विजः।

१०५. इमे नेतारो जनानां संशयेषु महात्मनि गान्धिनि तिष्ठन्ते स्म।

१०६. सत्योऽयमाभाणको मातृकं गावोऽनुहरन्ते पैतृकमश्वा इति।

१०७. अन्यत्र विसंवदन्तोपि न प्रेत्यभावे व्यूदिरे प्राज्ञः।

१०८. यदीच्छसि लोकस्य प्रियः स्यामिति तर्हि सन्ततमभ्यस्य संस्कृतेन संभाषाम्।

१०९. धन्योऽयं द्विजन्मा योऽगाधे शब्दशास्त्रे शिक्षते।

११०. विप्रतिष्ठन्ते विस्फुलिङ्गा इति हसन्तीं मोपश्लिषः।

---

१०३. क्रमते—यहाँ 'वृत्तिसर्गतायनेषु क्रमः' (१।३।३८) सर्ग (=उत्साह) अर्थ में आत्मनेपद होता है।

१०४. आदत्त—'आङो दोऽनास्यविहरणे' (१।३।२०) से दा से आत्मनेपद का नियम हुआ। पराकरोति—यहां 'अनुपराभ्यां कृञः' (१।३।७९) से परस्मैपद ही होता है।

१०५. तिष्ठन्ते—'प्रकाशनस्थेयाख्ययोश्च' (१।३।२३) से आत्मनेपद होता है। स्था धातु का अर्थ यहाँ भी स्थिति रखना, आश्रय लेना ही है। आत्मनेपद के प्रयोग से महात्मा गान्धी विवादपदनिर्णेता हैं ऐसा द्योतित होता है।

१०६. अनुहरन्ते—'हरतेर्गतताच्छील्ये' इस वार्तिक से आत्मनेपद हुआ। गतम् (=गतिम्) का अप्रयोग ही व्यवहारानुकूल है।

१०३. यह पढ़ने में उत्साह रखता है, और यह खेलने में। सगे भाई होते हुए भी ये दोनों स्वभाव से भिन्न-भिन्न हैं।

१०४. राजा का अन्न तेज को हर लेता है अतः ब्राह्मण राजा के दान को ठुकरा देते हैं।

१०५. ये जनता के अगुआ महात्मा गांधी को अपने संशयों का निर्णायक मानते थे।

१०६. यह सच्ची कहावत है गौएँ माता की चाल चलती हैं और घोड़े पिता की।

१०७. विषयान्तर में मतभेद रखते हुए भी प्राचीन (आर्यों) को पुनर्जन्म के विषय में विवाद नहीं था।

१०८. यदि तू चाहता है कि मैं लोक-प्रिय हो जाऊँ तो निरन्तर संस्कृत में बोलने का अभ्यास कर।

१०९. यह द्विज धन्य है जो अगाध व्याकरण शास्त्र में योग्य बनना चाहता है।

११०. चिन्गारियां निकल रही हैं अतः अंगीठी के पास मत जा।

---

१०७. व्यूदिरे—'भासनोपसंभाषा—' (१।३।४७) से वद् से विमति अर्थ में आत्मनेपद होता है। 'वि' वैमत्य का द्योतक है। केवल वद् में वैमत्य को कहने की सामर्थ्य नहीं, अतः विपूर्वक वद् से ही आत्मने० होता है। लिट् में सम्प्रसारण होकर व्यूदिरे (वि ऊदिरे) रूप सिद्ध होता है।

१०८. संस्कृतेन—करण में तृतीया है। वाक् अर्थप्रकाशन का करण (द्वार) है, अधिकरण नहीं।

१०९. शिक्षते—इस के लिये वाक्य १ का टिप्पण देखो।

११०. हसन्ती=अंगीठी। इस के दूसरे पर्याय ये हैं—अङ्गारधानिका, अङ्गारशकटी, हसनी। मोपश्लिषः—माङ् उपपद होने पर उपपूर्वक श्लिष् का लुङ् में रूप। पुषादित्वात् च्लि को अङ् हुआ।

१११. ये समुदाचारमुच्चरन्ते तेऽवगीयन्ते ।
११२. सङ्कटेनानेन संचरेण संचरमाणानि यानानि संघट्टन्ते ।
११३. ह्यः संक्रीडमानस्यास्योदग्रेणाश्मनाऽभिहतस्योरुपर्व व्यक्रामत् ।
११४. स साधिष्ठमुपकरोति लोकस्य यो रामायणं प्रकुरुते ।

११५. स्वर्णमुत्तपति स्वर्णकारो मूषायाम्
११६. केचिदाहुर्न वयं गृध्यामोऽर्थेषु किन्तर्ह्यर्था नो गर्धयन्तीति ।

११७. नेदमनीदृशं जगदिति जैमिनीयाः संगिरन्ते ।

११८. ये कापथमभिनिविशन्ते ते क्लिश्यन्ते ।
११९. संक्ष्णुष्व शस्त्रीम् । इयं कुण्ठिताश्रिर्न किमपि कृन्तति ।

---

१११. उच्चरन्ते—'उदश्चरः सकर्मकात्' (१।३।५३) से आत्मनेपद होता है । यदि धातु अकर्मक हो तो परस्मैपद ही रहेगा—बाष्पमुच्चरति= भाप उठती है । वेद में भी—तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् (पश्येम)=हम देवताओं से रखी गई पूर्व में निकलती हुई उस तेजस्वी आँख(=सूर्य) को देखें ।

११२. संचरेण=मार्गेण । 'संचर' घप्रत्ययान्त पुँल्लिङ्ग है । संचरमाणानि— 'समस्तृतीया—' (१।३।५४) से सम्पूर्वक चर् से आत्मने० होता है ।

११३. संक्रीडमानस्य—'क्रीडोऽनुसंपरिभ्यश्च' (१।३।२१) से आत्मने० होता हैं । ऊरुपर्व=जानु । व्यक्रामत्—विपूर्वक क्रम् से पादविहरण (=पाँव धरना, चलना) अर्थ में आत्मने० विधान किया है, किसी दूसरे अर्थ में तो नहीं । यहाँ जोड़ आदि का टूटना अर्थ है । अतः परस्मैपद ही रहा ।

११४. प्रकुरुते—'गन्धनावक्षेपण—' (१।३।३२) से प्रकथन अर्थ में आत्मनेपद का नियम हुआ । 'प्र' प्रकथन अर्थ का द्योतक है ।

१११. जो शिष्टाचार का उल्लंघन करते हैं उनकी निन्दा होती है।

११२. इस तंग रास्ते से चलती हुई गाड़ियाँ टकरा जाती हैं।

११३. कल खेलते हुए इस (लड़के) का गोडा ऊँचे पत्थर से टकरा कर टूट गया।

११४. जो रामायण की कथा करता है वह संसार का सबसे बड़ा उपकार करता है।

११५. सुनार मूषा(गुठाली) में सोने को तपाता है।

११६. कुछ लोगों का कहना है कि हमें धन आदि का लालच नहीं, किन्तु धन आदि हम में लालच उत्पन्न करते हैं।

११७. यह जगत् ऐसे ही रहता है यह जैमिनीय (मीमांसक) लोगों की प्रतिज्ञा है।

११८. जो कुमार्ग पर चलते हैं वे दुःख पाते हैं।

११९. छुरी को तेज़ कर। इसकी धार कुण्ठित हो गई है इस लिये यह कुछ भी नहीं काटती।

---

११५. उत्तपति—यहाँ 'उद्विभ्यां तपः' (१।३।२७) से आत्मने० नहीं हुआ, कारण कि यहाँ धातु सकर्मक है। स्वर्ण कर्म पड़ा है। आत्मनेपद तब होता है जब धातु अकर्मक हो अथवा स्वाङ्गकर्मक हो।

११६. गर्धयन्ति—'गृधिवञ्च्योः प्रलम्भने' (१।३।६९) से धोखा देने अर्थ में ही णिजन्त गृध् से आत्मनेपद का नियम है। यहाँ गर्ध (लालच) उत्पन्न करना अर्थ है, अतः परस्मैपद होने में कोई बाधा नहीं।

११७. संगिरन्ते—'समः प्रतिज्ञाने' (१।३।५२) से सम्पूर्वक गृ से आत्मने० होता है जब प्रतिज्ञा (=स्वीकार) अर्थ हो।

११८. अभिनिविशन्ते—यहाँ 'नेर्विशः' (१।३।१७) से आत्मने० हुआ, और 'अभिनिविशश्च' (१।४।४७) से अधिकरण की कर्म संज्ञा होकर 'कापथ' से द्वितीया हुई। क्लिश् दिवा० आ० अकर्मक है।

११९. संक्ष्णुष्व—'समः क्ष्णुवः' (१।३।६५) से आत्मने० होता है।

१२०. अम्बा दण्डेन भाययति चापलमाचरन्तं किशोरम्। न चासौ बिभेति वियातः।

१२१. शयालुरेष शिशुः। इमं शायय।

१२२. धन्यः स माणवको यो वेदे व्याकरणे च समं समुद्यच्छते।

१२३. प्रदीपप्रभा हि बाह्यं तमो नाशयति नान्तरम्।

१२४. स्वं कृत्यं सुष्ठु संविदन् प्राज्ञो मातापितृभ्यां संवित्ते।

१२५. यदा वृत्तिकर्शितो विप्रः कृषति भूमिं हलेन यदा च कृषाण औपाध्यायकं करोति तदा तौ व्यतिकुर्वाते।

१२६. समर्थोऽपि त्वं कस्मादृणं न विनयसे पैतृकम्?

---

१२०. भाययति—यहाँ हेतु (=प्रयोजक, यहाँ अम्बा) से भय नहीं, किन्तु दण्ड (=करण) से भय है। अतः यहाँ न तो आत्मनेपद हुआ और नहीं आत्व (भी के ई को आ) अथवा षुक् का आगम। हेतु से सीधा भय होने पर भापयते, भीषयते—ये दो रूप होंगे।

१२१. शयालुः—'स्पृहिगृहिपति—' (३।२।१५८) इस सूत्र में पढ़े हुए 'आलुचि शीङो ग्रहणं कर्तव्यम्' इस वार्तिक से शीङ् धातु से आलुच् प्रत्यय होता है। शायय—शी णिच् लोट्। यहाँ 'अणावकर्मकाच्चित्त—' (१,३,८८) से परस्मैपद का नियम है।

१२२. समुद्यच्छते—उद्यमं करोति। 'समुदाङ्भ्यो यमोऽग्रन्थे' (१।३।७५) से कर्त्रभिप्राय फल की विवक्षा में उद्पूर्वक यम् से आत्मने० होता है यदि 'ग्रन्थ' कर्म न हो। उद् पूर्वक यम् सकर्मक भी है और अकर्मक भी—चिकित्सामुद्यच्छति वैद्यः। काशिका। उद्यच्छमाना गमनाय पश्चात् (रघु० १६।२९)।

१२३. नाशयति—यहाँ 'बुधयुधनश—' (१।३।८६) से परस्मैपद का

१२०. माता शरारत करते हुए बच्चे को डण्डे से डराती है पर वह ढीठ नहीं डरता।

१२१. इस बच्चे को नींद आ रही है, इसे सुला दो।

१२२. वह लड़का धन्य है जो वेद तथा व्याकरण में बराबर उद्यम करता है।

१२३. दीये का प्रकाश बाहिर के अन्धकार को दूर करता है अन्दर के अन्धकार को नहीं।

१२४. अपने कर्तव्य को भली प्रकार जानता हुआ बुद्धिमान् पुरुष माता-पिता के साथ एक मति से रहता है।

१२५. जब जीविका के अभाव से दुःखी ब्राह्मण खेत पर हल चलाता है तब वह दूसरे (=वैश्य) के योग्य कर्म को करता है। और जब किसान पढ़ाता है वह भी।

१२६. तुम सामर्थ्य रखते हुए भी अपने पिता के ऋण को क्यों नहीं चुकाते?

नियम है। 'नाशयते' अपशब्द है।

१२४. संविदन्—सम्पूर्वक विद् (जानना) से 'विदिप्रच्छिस्वरतीनामुपसंख्यानम्' इस वचन से आत्मने० होता है जब यह धातु अकर्मक हो। यहाँ 'कृत्य' कर्म पड़ा है सो यहाँ आत्मने० नहीं हुआ। पर मातापितृभ्यां संवित्ते—यहाँ हो गया।

१२५. व्यतिकुर्वाते—यहाँ 'कर्तरि कर्मव्यतिहारे'(१।३।१४) से आत्मने० का नियम है। यत्रान्यसम्बन्धिनीं क्रियामन्यः करोति इतरसम्बन्धिनीं चेतरः स कर्मव्यतिहारः = जब दूसरे के साथ सम्बन्ध रखने वाली क्रिया को कोई और करता है उसे कर्मव्यतिहार कहते हैं। अर्थात् जब आपस में क्रियाओं का अदल-बदल होता है।

१२६. विनयसे—यहाँ 'संमाननोत्सञ्जन०—' (१।३।३६) से विगणन (परिशोधन) अर्थ में √नी से आत्मने० ही होता है। 'वि' विगणन का द्योतक है। इसके बिना केवल 'नी' से इस अर्थ की प्रतीति न होगी।

१२७. वह्नस्य श्रेष्ठिन आवेशनेषु कार्यमिति वहूनयमुपनयते कर्मकरान्।

१२८. सुजनेषु तिष्ठत्सु दुर्जनास्तरन्तीति खिद्यते नश्चेतः।

१२९. सुहृदो भोजनेन निमन्त्रयते तदर्थं च महतः संभारान् कुरुते।

१३०. यतेस्ते भौतिकेष्वर्थेष्वीदृश्यास्थेति महानन्तरायः सिद्धौ।

१३१. अभ्युदियादयं देशः स्वे महिम्नि च जागर्यादिति नित्यमाशास्महे।

१३२. केचिद्रक्ता अनुसरन्ति श्रियम्। श्रिया च केचिद्विरक्ता अनुस्त्रियन्ते।

१३३. राजान्नं तेजो जरयतीति नेदं प्रत्यगृह्णन् द्विजाः।

१३४. अतिश्रमः खलु जारयति तेज इन्द्रियाणाम्।

---

१२७. आवेशनेषु—शिल्पिशालासु, कारखानों में। आवेशनं शिल्पशाला—वैजयन्ती। उपनयते—नियुङ्क्ते। यहाँ 'सम्माननोत्सञ्जनाचार्यकरणज्ञानभृति—' (१।३।३६) से आत्मनेपद होता है। नीञ् का अर्थ प्रापण है, पर 'भृति' इसका विशेषण है, अतः इसे यों कह सकते हैं—उपनयते भृतिदानेन समीपं करोति। 'उप' यहाँ ऐसे सामीप्य का द्योतक है।

१२८. 'सप्तम्यधिकरणे च' (२।३।३६) यहाँ कारकार्हाणां चेत्यादि तीन वार्तिक पढ़े हैं। यहाँ 'तद्विपर्यासे च सप्तमी वक्तव्या' वार्तिक से सुजन शब्द से सप्तमी हुई। लक्ष्यलक्षणभाव की अविवक्षा में यह वचन है, अन्यत्र तो 'यस्य च भावेन भावलक्षणम्' (२।३।३७) इस सूत्र से सप्तमी सिद्ध ही है।

१२९. भोजनेन—यह हेतु में तृतीया है। हेतु-तृतीया का ही प्रयोग शिष्ट-सम्मत है। तादर्थ्य के न होने से चतुर्थी का विषय नहीं।

१२७. इस सेठ के कारखानों में बहुत काम है अतः यह बहुत से नौकर नियुक्त करता है।
१२८. सज्जन बैठे रह जाते हैं जब कि दुर्जन तर जाते हैं यह देख कर हमारा मन दुःखी होता है।
१२९. मित्रों को भोजन का निमन्त्रण देता है और उस हेतु बड़ी तैयारियाँ करता है।
१३०. यति होते हुए आप की भौतिक अर्थों में इतनी चाह है, यह सिद्धि में बड़ा भारी विघ्न है।
१३१. यह देश अभ्युदय को प्राप्त हो और अपनी महिमा को पहिचाने यह हमारी नित्य की प्रार्थना है।
१३२. कई रागी (आसक्त) लक्ष्मी का पीछा करते हैं और किन्हीं विरागियों का लक्ष्मी पीछा करती है।
१३३. राजा का अन्न तेज को क्षीण कर देता है इसलिये ब्राह्मण इसे नहीं स्वीकार करते थे।
१३४. अधिक परिश्रम निश्चय ही इन्द्रियों के तेज को क्षीण कर देता है।

---

१३०. आस्था--आदरः, अभिलाषः।

१३१. अभ्युदियात्--इण् गतौ, धातु है, अभि और उद् दो उपसर्ग हैं। आशीर्लिङ् प्र० पु० एक० का रूप है। अभ्युद्--ईयात्, इस अवस्था में 'एतेर्लिङि' (७।४।२४) से ह्रस्व हुआ। जागर्यात्--यह जागृ का आशीर्लिङ् है। यहाँ 'जाग्रोऽविचिण्--(७।३।८५) से कित् यासुट् परे होने पर धातु को गुण होता है।

१३३. जरयति--'जनीजॄष्--' गणसूत्र से जॄष् की मित् संज्ञा होकर 'मितां ह्रस्वः' (६।४।९२) से उपधा ह्रस्व हो जाता है।

१३४. जारयति--यहाँ धातु जॄ क्र्यादि है, और उसकी मित् संज्ञा नहीं, सो ह्रस्व न हुआ।

१३५. प्रतीहि वा न वा । अहमस्य क्षोत्स्यामि जानू, भङ्क्ष्यामि चोरू ।

१३६. विप्राः शापेन शत्रूनपरेधू राजन्याश्च चापेन ।

१३७. यो हि मन्दः परुषाक्षरैः सन्तक्षति सुहृदः स विस्मरति न वाक्क्षतं संरोहतीति ।

१३८. यो हि शादयति गा इति वक्तव्ये शातयति गा इति ब्रूयात्, वाढं दुष्येत् स मूढधीः ।

१३९. एतावतीभिरद्भिर्न शोत्स्यन्ति नो वस्त्राणि ।

१४०. यदि त्वं तस्मिन्प्रेष्यसे सोपि त्वयि प्रीतिं करिष्यति ।

१४१. हनुमताऽधिष्ठिता वानरा अनेकानि काननानि पर्याटन् न च सीतमासीदन् ।

१४२. कुणिं वा खञ्जं वा खलतिं वा मोपहसीः ।

---

१३५. क्षोत्स्यामि—क्षुदिर् सम्पेषणे रुधादि का लृट् में रूप है ।

१३६. अपरेधुः—यह अप-पूर्वक राध् स्वादि का लिट् में रूप है । 'राधो हिंसायाम्' (६।४।१२३) से 'एत्व' और अभ्यासलोप होता है । इस अर्थ में 'अप' उपसर्ग का प्रयोग नियम से होता है ।

१३७. सन्तक्षति—तक्ष त्वक्ष तनूकरणे (छीलने अर्थ में) भ्वादि में पढ़ी हैं । इस अर्थ में 'तनूकरणे तक्षः' (३।१।७६) से श्नु भी विकल्प से होता है । अन्यत्र तो यथाप्राप्त शप् ही होगा । यहाँ सन्तक्षति =भर्त्सयति ।

१३८. शादयति=क्षालयति, उदजति । यह शद्लृ शातने का णिच् प्रत्यय परे रहते लट् में रूप है । शातयति—यह भी उसी धातु का णिच् प्रत्यय परे रहते लट् का रूप है, पर अर्थ-भेद के कारण यहाँ धातु के द् को 'शदेरगतौ तः' (७।३।४२) से त् होता है ।

४२०. ये व्यायच्छन्ते ते न मेदन्ते, न च रुज्यन्ते ।

४२१. शरदि शालयः पच्यन्ते, काशः पुष्यति, पङ्कजानि च विकसन्ति । सुधासूतिरपि किमपि कामनीयकं धत्ते ।

४२२. शुचौ यातयामः श्राणः शाकः शुच्यति पूयते च कलया ।

४२३. प्रवयाः प्राजिता प्राजनेनाभिघातमभिघातम् ऋषभतरान् प्राजति ।

४२४. साऽनुदिनमङ्गैर्मुच्यते, न जाने केन रोगेण ग्रस्यत इवेति ।

४२५. रात्रौ रोचमान इन्दुः कस्य न प्रियोऽन्यत्र कामुकात् कुम्भीलकाच्च ।

---

४१९. आक्षारणा—आङ् के विना भी प्रयोग होता है । मैथुन-विषयक मिथ्या दोषारोप । अभिशंस्—का अर्थ दोष से युक्त करना, निन्दा करना है । स्पृशति=तुदति ।

४२०. व्यायच्छन्ते—वि, आङ् पूर्वक यम् । 'आङो यमहनः' (१।३।२८) से धातु के अकर्मक होने पर आत्मनेपद होता है । मेदन्ते—यह ञिमिदा स्नेहने भ्वादि आ० का रूप है ।

४२१. पुष्यति—पुष्प विकसने दिवा० प० का रूप है । कामनीयकम्—कमनीयस्य भावः । 'योपधाद् गुरूपोत्तमाद् वुञ्' (५।१।१३२) से वुञ् प्रत्यय होता है ।

४२२. श्राणः—श्रा पाके का क्तान्त । शुच्यति—ईशुचिर् पूतीभावे

४१८. देवदत्त यज्ञदत्त के पासंग भी नहीं। कहाँ राजा भोज, कहाँ कुबड़ा तेली।

४१९ आचार विषयक आरोप मेरे मर्मों में घाव करता है, और कोई मिथ्या दूषण मुझे इतना नहीं चुभता।

४२०. जो व्यायाम करते हैं वे मोटे नहीं होते और न ही रोगी होते हैं।

४२१. शरद् ऋतु में शाली पकता है, काश फूलती है और कमल खिलते हैं। चन्द्रमा भी अनोखी कान्ति को धारण करता है।

४२२. ग्रीष्म ऋतु में पकी हुई भाजी एक पहर ठहर जाने पर पानी छोड़ देती है और कुछ सड़ जाती है।

४२३. बूढ़ा गाड़ीवान् प्राजन (पैनी) से मार-मार कर भार ढोने में मन्दशक्ति वाले बैलों को हाँकता है।

४२४. वह प्रतिदिन शिथिल हो रही है, न मालूम इसे कौन सा रोग खाये जा रहा है।

४२५. रात को चमकता हुआ चाँद किसे नहीं भाता, कामी और चोर को छोड़ कर।

इस दिवा० प० धातु का रूप है। पूतीभावः=क्लेदः। पूयते—यह पूयी विशरणे भ्वा० आ० का रूप है।

४२३. प्रवयाः—प्रवृद्धं वयो यस्य सः। प्राजिता—प्रपूर्वक 'अज गतिक्षेपणयोः' इस से तृन् वा तृच् करके रूपनिष्पत्ति होती है। प्राजनम्—प्रवीयतेऽनेनेति। प्राज्यतेऽनेनेति नहीं कह सकते। 'अजेर्व्यघञपोः' (२।४।५६) से 'अज्' को 'वी' हो जाता है। प्राजनं तोदनं तोत्रम्—अमर। ऋषभतरान्—ऋषभा अनड्वाहः। भारवहने मन्दशक्तय ऋषभाः=ऋषभतराः। 'वत्सोक्षाश्वर्षभेभ्यश्च तनुत्वे' (५।३।९१) से ष्टरच् प्रत्यय होता है।

४२५. कस्य न प्रियः—प्रीणातीति प्रियः, कः प्रत्ययः। 'कस्य' में कृद्योगलक्षणा षष्ठी है।

४२६. क्रमते तस्य बुद्धिर्ऋक्षु नत्वन्याये तु सज्जते।

४२७. य उत्पन्नभक्षिणस्तेऽन्तेऽवसीदन्ति।

४२८. यदाऽहं लोके हिंसामुत्तरोत्तरं वर्धमानां लक्षये तदा नाशंसे लौकिकाय शमाय।

४२९. यां सिक्थकवर्तिरिति वेत्थ सा वसादशा भवति।

४३०. ग्लानोऽयं जनो मन्दमन्दं क्रामति वाचा च सज्जमानया कथंचिद् ब्रवीति।

४३१. अतिवृष्टेश्छदिरस्य सदनस्य प्रश्च्योतति, येनातङ्कामः।

४३२. सर्वरात्रं धारासारैर्वृष्टो देवः, अभिषिक्तश्च गृहेऽन्तः सर्वः परिवर्हः।

४३३. कर्दति मे कुक्षिः, किंचिद् व्यथते च। वातोपि प्रकुप्यति मात्रया।

---

४२६. क्रमते—यहाँ 'वृत्तिसर्गतायनेषु क्रमः' (१।३।३८) से वृत्ति (अप्रतिबन्ध=रुकावट का अभाव) अर्थ में क्रम् से आत्मनेपद होता है। सज्जते—यहाँ भाष्यकार के प्रयोग से आ० साधु है। रुकने अर्थ में सज्ज् का प्रयोग श्रीरामायण में बहुत देखा जाता है—वाचा सज्जमानया।

४२८. शमाय आशंसे—आङ् शंस् के प्रयोग में जिस वस्तु की आशा की जाती है उस में द्वितीया तथा चतुर्थी का व्यवहार देखा जाता है। तदा नाशंसे विजयाय संजय (महाभारत आ०)। आशंसन्ते···धनुषि विजयं पौरुहूते च वज्रे (शाकुन्तल २।१६)।

४३०. मन्दमन्दम्—'प्रकारे गुणवचनस्य' (८।१।१२) से मन्द शब्द द्विरुक्त होता है। 'कर्मधारयवदुत्तरेषु' (८।१।११) से कर्मधारयवद्भाव होता है,

४२६. उसकी बुद्धि ऋचाओं में खूब चलती है, पर नव्य न्याय में रुक जाती है।

४२७. जो जितना कमाते हैं, उतना ही खा लेते हैं वे अन्त में दुःख पावे हैं।

४२८. जब मैं देखता हूँ कि लोक में हिंसा उत्तरोत्तर बढ़ती जा रही है तो मुझे संसार की शान्ति की कोई आशा नहीं रहती।

४२९. जिसे तू मोम की बत्ती समझे बैठा है, वह चरबी की बत्ती है।

४३०. रोग से क्षीण हुआ यह पुरुष धीरे-धीरे पग धरता है और लड़-खड़ाती हुई वाणी से कठिनता से बोलता है।

४३१. अतिवृष्टि के कारण इस मकान की छत टपकती है, जिस से हम तंग आ गये हैं।

४३२. सारी रात मुसलाधार वृष्टि हुई और घर का सारा सामान भीग गया।

४३३. मेरे पेट में गुड़गुड़ हो रही है, कुछ व्यथा भी है और कुछ वात का प्रकोप भी है।

अर्थात् सुप् का लोप, पुंवद्भाव (जैसे पटुपट्वी में) और अन्तोदात्त कार्य होते हैं।

४३१. आतङ्कामः—आङ् पूर्वक तकि कृच्छ्रजीवने भ्वा० प० का रूप है।

४३२. सर्वरात्रम्—सर्वां रात्रिम्। 'अहःसर्वैकदेशसंख्यातपुण्याच्च रात्रेः' (५।४।८७) से अच् समासान्त होता है। 'रात्राह्नाहाः पुंसि' (२।४।२९) से 'सर्वरात्र' पुं० होता है। परिबर्हः—परिच्छदे नृपार्हेऽर्थे परिबर्हः—अमर। अर्थे=वस्तुनि धने वा—क्षीरस्वामी।

४३३. कर्दति—कर्द कुत्सिते शब्दे भ्वादि प०। कुत्सिते कौक्षे इति भट्टोजिः। मात्रया—यहाँ 'प्रकृत्यादिभ्य उपसंख्यानम्' से तृतीया हुई है।

४३४. यदि मांसमश्नासि, नेदं तवोपकरोति, केवलं शास्त्रमतिचर्यते ।

४३५. य इदं ममोपशेते इदं नोपशेते इति विविच्यान्नमश्नाति स नो अभ्यमति ।

४३६. यदि कश्चिन्निशाम्यति मित्रं मे मां सूचयति तदा भृशं दुःख्यति ।

४३७. पित्तलमम्लमन्यत्र दाडिमामलकात् ।

४३८. न हि स आतुरः, आतुरलिङ्गी स भवति ।

४३९. यज्ञे पश्वालम्भः श्रेयसामर्थे पापीयानारम्भ इति पश्यामः । अपरेऽत्र विप्रतिपद्यन्ते ।

४४०. अद्यापि कुमारयन्तीमे कुमारा आक्रीडिनः पाठेष्वनवहिताः ।

४४१. मन्दं मन्दं वारिकणिका वर्षति वारिवाहः । ह्रसितमुष्णम् ।

---

४३४. अतिचर्यते—अतिक्रम्यते, उल्लङ्घ्यते ।

४३५. ममोपशेते—यहाँ उप शी (ङ्) सात्म्य (अनुकूल) होने अर्थ में है । अभ्यमति—अभिपूर्वक अम रोगे भ्वा० प० का रूप है । छन्द (वेद) में शप् का लुक् होने पर 'तुरुस्तुशम्यमः सार्वधातुके' (७।३।९५) से ईट् का आगम होकर 'अभ्यमीति' रूप भी होगा । 'नो' ओदन्त निपात है ।

४३६. निशाम्यति—निपूर्वक शमु उपशमे दिवा० प० का रूप है । उपसर्गवश सुनना अर्थ हुआ और धातु सकर्मक हो गई । मां सूचयति—मां परस्मै कथयति, मद्विषये पैशून्यवचो ब्रूते । सूच पैशुन्ये चुरादि । पिशुनौ खलसूचकौ—इस प्रमाण से सूचक = पिशुन । दुःख्यति—दुःख सुख तत्क्रियायाम् कण्ड्वादिगण की धातु है । दुःखमनुभवति = दुःख्यति ।

४३७. पित्तलम्—पित्तमस्यास्तीति । 'सिध्मादिभ्यश्च' (५।२।९७) से मत्वर्थ में लच् प्रत्यय हुआ है ।

४३४. यदि तू मांस खाता है तो इस से तुझे कुछ लाभ नहीं, केवल शास्त्र का उल्लंघन होता है।

४३५. जो यह मेरे अनुकूल है, यह अनुकूल नहीं इस बात का विचार कर खाता है वह रोगी नहीं होता।

४३६. यदि कोई सुनता है कि मेरा मित्र मेरी चुगली करता है तो वह बहुत दुःखी होता है।

४३७. सभी खट्टे पदार्थ गरमी करने वाले होते हैं, अनार और आमले को छोड़ कर।

४३८. वह बीमार नहीं, बीमार होने का बहाना करता है।

४३९. यज्ञ में पशुवध कल्याणार्थ पाप कर्म है ऐसा हमारा विचार है। दूसरे लोग इस में मतभेद रखते हैं।

४४०. अब भी क्रीडा-रसिक ये लड़के खेल रहे हैं, इन्हें अपनी पढ़ाई का कुछ भी ध्यान नहीं।

४४१. धीरे-धीरे नन्ही नन्ही बूंदें पड़ रही हैं। गरमी कम हो गई है।

---

४३८. आतुरलिङ्गी—तुर त्वरणे इस जुहोत्यादि छान्दस धातु से 'क' प्रत्यय और आङ् आने पर आतुर रूप सिद्ध होता है—आतुतोर्ति इत्यातुरः। ईषत् त्वरत इत्यर्थः। आतुरस्य लिङ्गमिव लिङ्गमस्येति आतुरलिङ्गी।

४४०. कुमारयन्ति—कुमार क्रीडायाम् चुरादि का रूप है। आक्रीडिनः—आक्रीडितुं शीलमेषाम्। 'सुप्यजातौ णिनिस्ताच्छील्ये' (३।२।७८) से णिनि प्रत्यय होता है। सुप् से उपसर्ग का भी ग्रहण होता है, ऐसा भट्टोजि दीक्षित का मत है।

४४१. मन्दं मन्दम्—यहाँ वीप्सा में द्विरुक्ति है, प्रकार अर्थ विवक्षित नहीं, अतएव कर्मधारयवद्भाव नहीं हुआ, जैसा कि मेघदूत में 'मन्दं मन्दं नुदति पवनः' इस प्रयोग में। उष्णम्—यह भावप्रधान निर्देश है। उष्णम् =औष्ण्यम्। ऐसे निर्देश में भगवान् सूत्रकार का 'द्व्येकयोर्द्विवचनैकवचने' (१।४।२२) में द्वि और एक शब्द का द्वित्व और एकत्व अर्थ में प्रयोग ज्ञापक है।

४४२. यदा भूः कम्पते तदा क्वचिदियमुदञ्चति, क्वचिन्न्यञ्चति, क्वचिन्महागर्ताः संजायन्ते जलं च प्रस्रवति ।

४४३. अवस्तीर्यते नभस्तलं वारिदैः, ह्रादते च ह्रादिनी ।
४४४. अमूर्छन्निशि तमः पथश्चाभ्रंशामहि ।
४४५. य आत्मना व्यकत्थन्त तेऽध्वंसन्त ।
४४६. सूर्योढस्य यात्रिण आरण्यका निकाममातिथ्यमन्वतिष्ठन् ।

४४७. तदा मां निद्रा नागच्छत्, चिरमहं नेत्रे निमील्य शयनीये न्यपद्ये, रणरणकदायिनं तमेव पूर्वव्यतिकरं चास्मरम् ।
४४८. सुचिरं व्यचरं भुवम्, तेन विजानामि विचित्रस्यास्य सर्गस्य सौन्दर्यम् ।
४४९. ततः शङ्खाश्च भेर्यश्च तथा तरसाऽभ्यहन्यन्त यथा सुदूरेऽपि स्थितानां नः श्रोत्रयोरमूर्छच्छब्दः ।
४५०. क्रमेणाजीर्याम करणवैकल्यं चायाम ।
४५१. ह्यः शैत्यादतितरां प्रतिशीनोऽभवं जूर्णश्च, भ्रान्तिश्च मे शिरसोऽभूत् ।

---

४४४. अमूर्छत्—'मुर्छा मोहसमुच्छ्राययोः' इस भ्वादि प० धातु का समुच्छ्राय (वृद्धि) अर्थ में प्रयोग है ।

४४५. आत्मना व्यकत्थन्त—कत्थ श्लाघायाम् भ्वा० आ० । इस धातु का प्रयोग आत्मश्लाघा में ही देखा जाता है, परश्लाघा में नहीं । आत्मना—यह करण-तृतीयान्त है । अपने आप अपनी स्तुति करता है, ऐसी विवक्षा है । इस अर्थ में द्वितीयान्त 'आत्मानम्' का प्रयोग नहीं होता । ऐसा प्रतीत होता है कि वह (कर्म) धात्वर्थ से उपसंगृहीत हो जाता है ।

४४६. सूर्योढस्य—सूर्येण ऊढः प्रापितः (वसतिम्) इति । आरण्यकाः—'अरण्यान्मनुष्ये' (४।२।१२९) से वुञ् प्रत्यय होता है ।

४४२. जब भूचाल आता है तब पृथिवी कहीं पर उभर आती है, कहीं पर धस जाती है। कहीं पर बड़े गढ़े बन जाते हैं और पानी निकल पड़ता है।

४४३. आकाश बादलों से घिर गया है और बिजली कड़क रही है।

४४४. रात को अन्धेरा छा गया और हम रास्ता भूल गये।

४४५. जिन्होंने आत्मश्लाघा की, वे नष्ट हुए।

४४६. सूर्यास्त समय आये हुए आगन्तुक की अरण्यनिवासियों ने अच्छी तरह अतिथि सेवा की।

४४७. तब मुझे नींद नहीं आई। चिर तक आँखें बन्द कर बिस्तरे पर पड़ा रहा, उसी चिन्ताजनक वृत्तान्त का स्मरण करता रहा।

४४८. मैं बहुत घूमा हूँ, इसलिये इस नानारूप जगत् के सौन्दर्य को खूब जानता हूँ।

४४९. तब शंख और ढोल इस ज़ोर से बजे कि बहुत दूर खड़े हुए हमारे कानों में शब्द स्पष्ट सुनाई देता था।

४५०. धीरे-धीरे हम बूढ़े हो गये और इन्द्रिय-दुर्बलता को प्राप्त होगये।

४५१. कल शीत के कारण मुझे जुकाम हो गया और ज्वर भी आ गया, और सिर भी चकराने लगा।

---

४४७. न्यपद्ये—निपूर्वक पद् का अर्थ लेटना है।

४४८. भुवम्—'देशकालाध्वगन्तव्याः कर्मसंज्ञा ह्यकर्मणाम्' इस वचन से 'भू' की कर्मसंज्ञा हुई। वि पूर्वक चर् अकर्मक है।

४४९. अभ्यहन्यन्त—अभि पूर्वक हन् का अर्थ ताडना, पीटना है। तरसा—अव्यय। अमूर्छत्—मूर्छा का अर्थ समुच्छ्राय (बढ़ना) है। यहाँ इतना बढ़ना कि सुस्पष्ट सुनाई देना इस अर्थ में उपचरित होता है।

४५१. प्रतिशीनः—प्रतिपूर्वक श्यैङ् गतौ भ्वा० आ० से निष्ठा (क्त) प्रत्यय परे होने पर रूप है। 'प्रतेश्च' (६।१।२५) से यहाँ श्यैङ् को सम्प्रसारण होता है। 'श्योऽस्पर्शे' (८।२।४७) से निष्ठा तकार को नकार होता

४५२. आसारैरवर्षद् देव इति नाहमाशीयो गेहात् प्रयातुमुदसहे।
४५३. लुण्टाका उद्बध्य मार्यन्तामित्यादिशन्नधिकृताः।

४५४. यदैकागारिको गृहपतिं जागरितमपश्यत्तदा भीतवत् सहसापाक्रामत्।
४५५. यदि तेऽसन्मार्गमभिनिवेक्ष्यन्तेऽवश्यं प्रलेष्यन्ते।
४५६. आशङ्के क्षतानि ते चिरेण संरोक्ष्यन्ति। अदूरे च वर्षाः। वर्षासु च तथाजातीयकानि व्रणानि विक्रियन्ते।
४५७. एवं लोके लाघवं यास्यसि। बहुमतस्य लाघवं नाम मरणपर्यायः।
४५८. यदि सोऽनूचीनानि षडहानि नोपस्थास्यते पाठेषु तदा तीव्रं शासिष्यते।
४५९. पूर्वं क्षुरं निश्य ततः कूर्चं वप।
४६०. ज्वलतोऽङ्गारानेकैकशः कङ्कमुखेन धारय, समुह्य च वारिणा शमय।

है। जूर्णः—ज्वर् का निष्ठान्त रूप है। 'आदितश्च' (७।२।१६) में 'च' अनुक्त समुच्चय के लिये है ऐसा काशिकाकार कहते हैं। इस से आश्वस्तः, वान्तः, जूर्णः इत्यादि प्रयोगों में इडभाव उपपन्न हो जाता है, अन्यथा इट् का निषेध करने वाला कोई शास्त्र नहीं। 'ज्वरत्वर—' (६।४।२०) से व् और उपधा के स्थान में ऊठ् होता है।

४५२. आसारैः—धारासम्पात आसारः—अमर। आशीयः—आशु-तरम्। क्रियाविशेषण।

४५४. ऐकागारिकः—यह 'ऐकागारिकट् चौरे' (५।१।११३) में निपातन किया है।

४५५. अभिनिवेक्ष्यन्ते—अभि नि पूर्व विश् का रूप। 'नेर्विशः' (१।३।१७) से आ०, 'अभिनिविशश्च' (१।४।४७) से अधिकरण (असन्मार्ग)

४५२. मुसलाधार वृष्टि हुई अतः मैं जल्दी घर से नहीं चल सका।

४५३. लुटेरों को फाँसी लटकाया जाय ऐसा अधिकारियों ने आदेश दिया।

४५४. जब चोर ने देखा कि घर का स्वामी जाग उठा है तब वह डर के मारे एक दम भाग गया।

४५५. यदि वे कुमार्ग में लगे रहेंगे तो अवश्य नष्ट हो जायेंगे।

४५६. मुझे डर है तुम्हारे घाव चिर से भरेंगे। और बरसात आने वाली है। बरसात में इस प्रकार के व्रण बिगड़ जाते हैं।

४५७. इस प्रकार तू लोक में अपमान को प्राप्त होगा। आदर प्राप्त किये हुए का अपमान मृत्यु का ही दूसरा नाम है।

४५८. यदि वह लगातार छः दिन अपने पाठों में उपस्थित नहीं होगा तो उसे तीव्र दण्ड दिया जायगा।

४५९. पहले उस्तरे को तेज कर लो, फिर दाढ़ी मूँडो।

४६०. जलते हुए कोयलों को चिमटे से पकड़ो, इन्हें इकट्ठे करके पानी से बुझा दो।

की कर्मसंज्ञा होती है।

४५६. संरोक्ष्यन्ति—सम्पूर्वक रुह् का लृट्।

४५७. मरणपर्यायः—मरणस्य पर्यायः पर्यायवचनः, नामान्तरम्।

४५८. अनूचीनानि—अनुक्रमेण भवानि, अव्यवहितानि=लगातार। अन्वगेव=अनूचीनम्। 'विभाषाञ्चेरदिक् स्त्रियाम्' (५।४।८) से स्वार्थ में 'ख' प्रत्यय होता है।

४५९. निश्य—शो तनूकरणे दिवा० प० का लोट् म० पु० एक०। 'नि' उपसर्ग है।

४६०. समुह्य—सम्पूर्वक 'ऊह वितर्के' का ल्यबन्त रूप है। 'उपसर्गाद् ध्रस्व ऊहतेः' (७।४।२३) से धातु को ह्रस्व हुआ। उपसर्गवश अर्थान्तर हुआ।

४६१. धर्मे ते धीयतां धीः सत्ये च निस्तिष्ठतु ।
४६२. बाला मद्वचनाल्लालनीया वृद्धाश्च नमो वाच्याः ।
४६३. इहैवोपानहाववमुञ्च, नातः परं देवतायतनभूभागे प्रतिमुक्तोपानत्को गन्तुमर्हसि ।
४६४. आश्चर्यमन्धो नाम लेखिष्यति पठिष्यति च । पुरा तु नास्य संभवोऽभूत् ।
४६५. अपि गगनं पतेत्, तिग्मांशुर्वा शीततामियात्, हिमवान्वा हिमं जह्यात्, सागरो वा वेलामतीयात्, मद्वचनं तु न विपरीयात् ।
४६६. शरीरे चेदादतोऽभविष्यन्नोपतप्तोऽभविष्यत् ।
४६७. उत त्वं मार्गेणानेन यान्तं शकटमद्राक्षीः ? नाहमदर्शम्, अन्यत्रमना अभूवम् ।
४६८. अहं सर्वात्मनाऽयतिषि, सिद्धिस्त्वीश्वरेऽधि ।

---

४६१. निस्तिष्ठतु—निश्चितं तिष्ठतु । निस् पूर्व स्था धातु का अर्थ निष्ठा (=निश्चित स्थिति) रखना है । ध्यान रहे इस अर्थ में निस् उपसर्ग का प्रयोग होता है, नि का नहीं । निष्ठा में भी निस् उपसर्ग है । निस् के 'स्' को विसर्ग होकर उसका 'खर्परे शरि विसर्गलोपो वा वक्तव्यः' इस वार्तिक से लोप हो जाता है । यह लोप 'उपसर्गात्सुनोतिसुवति—' (८।३।६५) इस मूर्धन्य (ष्) विधायक शास्त्र के लिये सिद्ध है, अतः 'नि-स्था' इस अवस्था में 'ष्' होकर 'निष्ठा' रूप सिद्ध होता है ।

४६२. मद्वचनात्—मद्वचनमाश्रित्य । 'ल्यब्लोपे कर्मण्युपसंख्यानम्' इस वार्तिक से कर्म में पञ्चमी हुई ।

४६३. अवमुञ्च—अव मुच् का अर्थ उतारना है और प्रतिमुच् तथा आ (ङ्) मुच् का पहनना, धारण करना है । प्रतिमुक्तोपानत्कः—प्रतिमुक्ते उपानहौ येन सः । 'उरःप्रभृतिभ्यः कप्' (५।४।१५१) से 'कप्' समासान्त होता है ।

४६१. धर्म में तेरा मन लगे और सत्य में निष्ठा वाला हो ।

४६२. बच्चों को मेरी ओर से प्यार देना और बड़ों को नमस्कार कहना ।

४६३. जूता यहीं उतार दो, इस से आगे देवालय की भूमि में जूता पहने नहीं जा सकते हो ।

४६४. आश्चर्य है अन्धा लिखता और पढ़ता है । पहले समय में तो यह असंभव था ।

४६५. चाहे आकाश गिर जाय, चाहे सूर्य शीतल हो जाय, चाहे हिमालय हिम को छोड़ दे, चाहे समुद्र अपनी मर्यादा को लाँघ जाय, पर मेरा वचन विपरीत न होगा ।

४६६. यदि वह शरीर का ख्याल रखता तो बीमार न होता ।

४६७. क्या तुम ने इस मार्ग से जाते हुए छकड़े को देखा ? मैंने नहीं देखा, मेरा मन किसी दूसरी ओर था ।

४६८. मैं ने भरसक यत्न किया, पर सिद्धि ईश्वर के अधीन है ।

---

४६४. लेखिष्यति, पठिष्यति—यहाँ चित्रीकरण गम्यमान होने पर 'शेषे लृडयदौ' (३।३।१५१) से सर्वलकारापवाद धातुमात्र से लट् होता है, यदि 'यदि' का प्रयोग न हो ।

४६५. पतेत्—इत्यादि में 'संभावनेऽलमिति चेत्सिद्धाप्रयोगे' (३।३। १५४) से लिङ् हुआ है । विपरीयात्—विपरि पूर्वक इण् गतौ का विधिलिङ् में रूप । =विपरि इयात् । अपि शब्द संभावना का द्योतक है ।

४६६. आदृतः—यहाँ कर्ता अर्थ में क्त हुआ है । आदृतौ सादरार्चितौ—अमर । उपतप्तः—उप पूर्वक तप् का कर्मवाची प्रत्यय (तिङ्, कृत्) होने पर रोगी होना अर्थ है । कर्तृवाची प्रत्यय परे होने पर दुःख देना, रोगयुक्त करना अर्थ है ।

४६७. उत—यह प्रश्नार्थक अव्यय है ।

४६८. सर्वात्मना=सर्वेण शरीरेण । 'आत्मन्' का शरीर अर्थ आध्यात्मिकं दुःखम्, महात्मा (महाकायः) रावणः इत्यादि प्रयोगों में प्रसिद्ध है ।

४६९. मा दुषद् इति श्रीणीहि पयः ।
४७०. किं श्टतं क्षीरेण ? अङ्ग श्राति पयः ।
४७१. परार्थं माऽभिध्यासीः । अभिध्यामपि पापमाहुर्मनीषिणः ।

४७२. अवसायय सपदि स्वा गिरः । उद्विजन्ते श्रोतारः ।
४७३. दृढं श्रान्तोऽस्मि । कंचित्कालं संविविक्षामि । शयनीयं विरचयेति प्रेष्यं प्रचोदय ।
४७४. ये समीत्संन्ति तैर्नियतैः प्रयतैश्च भवितव्यम् ।

४७५. यदाऽहं तस्य भाषितं परिभावयामि तदा नात्र बहुगुणं विभावयामि ।
४७६. यदि स पाने प्रसङ्क्ष्यति ध्रुवं निराकरिष्यते ।

'आत्मन्' का यह अर्थ कैसे हुआ, इसे हम अपनी कृति 'पदार्थविकासः' में कहेंगे । ईश्वरेऽधि—'अधिरीश्वरे' (१।४।९७) से 'अधि' की कर्मप्रवचनीय संज्ञा हुई । 'यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी' (२।३।९) से 'ईश्वर' शब्द से सप्तमी हुई ।

४६९. मा दुषत्—दुष वैकृत्ये दिवा० का माङ् उपपद होने पर लुङ् । पुषादि होने से अङ् । श्रीणीहि—श्रीञ् पाके क्रयादि का लोट् । यह सकर्मक है । इस में 'गोभिः श्रीणीत मत्सरम्' (ऋ० ९।४६।४) यह मन्त्र प्रमाण है ।

४७०. शृतं क्षीरेण—'श्रृतं पाके' (६।१।२७) यह व्यवस्थित विभाषा है । क्षीर अथवा हविः का पाक हो तो नित्य ही 'श्रा' को श्रृभाव होता है । श्राति—श्रा पाके—यह अदादि प० धातु अकर्मक है, यह इस सूत्र की वृत्ति में स्पष्ट है ।

४७१. माऽभिध्यासीः—ध्यै चिन्तायाम्—लुङ् । अभिध्यानं सतृष्णं परकीयार्थस्यावलोकनम् ।

४६९. दूध बिगड़ न जाय, इसलिये इसे पका लो।

४७०. क्या दूध पक गया है, आर्य दूध अभी पक रहा है।

४७१. दूसरों की चीज़ लेने का ध्यान मत कर। ऐसा ध्यान भी पाप है, यह बुद्धिमानों का कहना है।

४७२. अपना भाषण जल्दी समाप्त कीजिये। श्रोता लोग घबरा रहे हैं।

४७३. मैं बहुत थक गया हूँ, कुछ समय सोना चाहता हूँ। नौकर से कहो मेरे लिये बिस्तरा लगा दे।

४७४. जो समृद्ध होना चाहते हैं उन्हें नियमवान् और पवित्र होना चाहिए।

४७५. जब मैं उस के भाषण पर विचार करता हूँ तो उस में बहुत गुण नहीं देखता हूँ।

४७६. यदि वह सुरापान में आसक्त रहेगा, अवश्य जातिपङ्क्ति से बाहिर कर दिया जायगा।

---

४७२. अवसायय—अव पूर्वक षोऽन्तकर्मणि+णिच् का लोट्।

४७३. दृढम्—भृशम्। 'बाढगाढदृढानि च' ऐसा अमरकोष में भृश (अधिक) के पर्यायों में पाठ है। संविविक्षामि—सम् विश्+सन्।

४७४. समीर्त्सन्ति—सम् पूर्वक ऋध् का सन्नन्त। 'सनीवन्तर्ध—' (७।२।४९) से 'सन्' को इट् विकल्प से होता है, अतः पक्ष में 'समर्दिधिषन्ति' रूप भी होगा। प्रयतैः—प्र पूर्वक यम् का क्तान्त रूप। उपसर्गवश धात्वर्थ में परिवर्तन।

४७५. परिभावयामि = चिन्तयामि। भुवोऽवकल्कने, चुरादि। अवकल्कन=मिश्रीकरण अथवा चिन्तन। विभावयामि—विशेषेण भावयामि। वि-भू-णिच्।

४७६. प्रसङ्क्ष्यति—प्र-सञ्ज् का लृट्। निराकरिष्यते—'प्रत्याख्यातो निराकृतः'—अमर। हर्षचरित में 'निराकृत' जातिबहिष्कृत अर्थ में प्रयुक्त हुआ है जैसे दुर्वासा के प्रति शापोद्यत सावित्री के 'आः पाप, क्रोधोपहत,

४७७. संह्रियतां वचः, त्वरमाणमानसाः सम्प्रति सामाजिकाः ।

४७८. यः कल्ये विहरति स कल्यो भवति ।

४७९. रविरुद्गच्छति, तमश्चापगच्छति, संगत्य च क्वणन्ति कलं शकुन्तयः ।

४८०. आगमयस्व तावन्माणवक, अभित आगच्छन्ति गुरुचरणाः ।

४८१. अद्य कश्चिदस्मद् गृहानभ्यागतः । तस्यातिथ्यं करणीयमिति सत्वरोऽस्मि ।

४८२. ये समुदाचारमुच्चरन्ते तेऽवगीयन्ते ।

४८३. मुक्तावुत्तिष्ठन्ते मुनयः साङ्ख्येन योगेन वा ।

४८४. सुवर्णमावर्तयति स्वर्णकारस्तैजसावर्तन्याम् ।

४८५. किं करोषि? पय आवर्तयामि किलाटं सम्पादयिष्यामीति ।

४८६. अयं रज्जुसृड् एकेनाह्ना तिस्रो रज्जूरावर्तयति ।

४८७. प्रसन्नो ब्राह्मणशेषः, नैष व्याख्यानमपेक्षते ।

४८८. अभ्युच्चितास्तर्काः प्रभावुका भवन्ति ।

दुरात्मन्, अज्ञ, अनात्मज्ञ, ब्रह्मबन्धो, मुनिखेटापसद, निराकृत इत्यादि वचन में । शङ्कर ने अपने 'संकेत' में निराकृत का 'अस्वाध्याय' (स्वाध्यायहीन) अर्थ किया है, पर अमर में तो 'अस्वाध्यायो निराकृतिः' ऐसा पाठ है ।

४७७. सामाजिकाः—समाजं रक्षन्ति इति । सभ्याः ।

४७८. कल्ये—प्रातःकाल में । कल्य—नपुं० । कल्यः—वार्तो निरामयः कल्यः—अमर ।

४८०. अभितः—समीपे काले, शीघ्रं वा । समीपोभयतः शीघ्रसाकल्याभिमुखेऽभितः—अमर । अभितः = अभी । गुरुचरणाः—पूज्या गुरवः । यहाँ चरण शब्द पूजावचन है । मयूरव्यंसकादि तत्पुरुष है । अस्वपदविग्रह होने से नित्य समास है ।

४७७. भाषण को संक्षिप्त कीजिये, सभा उतावली हो रही है।

४७८. जो प्रातः सैर करता है वह नीरोग रहता है!

४७९. सूर्य निकल रहा है, अन्धेरा दूर हो रहा है, पक्षिगण मिलकर मीठा-मीठा शब्द कर रहे हैं।

४८०. हे बाल, धैर्य धरो, गुरु जी अभी आ रहे हैं।

४८१. आज हमारे घर पाहुना आया है, उस का आतिथ्य करना है, अतः मुझे जल्दी है।

४८२. जो शिष्टाचार का उल्लंघन करते हैं उनकी निन्दा होती है।

४८३. मुनि लोग साङ्ख्य अथवा योग मार्ग से मुक्ति के लिये यत्न करते हैं।

४८४. सुनार सोने को मूषा (=कुठिया) में पिघलाता है।

४८५. क्या कर रहे हो। दूध औटा रहा हूँ, खोआ बनाऊँगा।

४८६. यह रस्सी बटने वाला एक दिन में तीन रस्सियाँ बट लेता है।

४८७. ब्राह्मण का शेष भाग विस्पष्ट है, इस के व्याख्यान की आवश्यकता नहीं।

४८८. एकत्र संगृहीत युक्तियाँ (अर्थसाधन में) समर्थ होती हैं।

---

४८१. गृहान्—गृह शब्द बहुवचन में पुं० में भी प्रयुक्त होता है। एक घर के लिए भी बहुवचन प्रयुक्त हो सकता है।

४८२. उच्चरन्ते—उल्लङ्घन्ते। 'उदश्चरः सकर्मकात्' (१।३।५३) से उद् पूर्वक चर् से आत्मने० होता है। अवगीयन्ते = निन्द्यन्ते। अव-गै का निन्दा करना अर्थ है। यथा अनवगीतः परिचयः।

४८३. उत्तिष्ठन्ते—'उदोनूर्ध्वकर्मणि' (१।३।२४) तथा 'उद ईहायाम्' इस वार्तिक से यहाँ उद् पूर्वक स्था धातु से आत्मने० होता है।

४८७. प्रसन्नः = विशदः। प्रसन्ना आपः = विमलं जलम्।

४८८. अभ्युच्चिताः—अभि उद् पूर्वक चि का क्तान्त। अभ्युच्चयः = वृद्धिः। प्रभावुकाः—'लषपतपद—' (३।२।१५४) से उकञ्। प्रभवन्तीत्येवशीलाः।

४८९. नाहं तेऽभिसन्धिमुन्नयामि। निर्भिन्नार्थतरकमुच्यताम्।

४९०. हिन्दुसंस्कृतेः प्रतिपत्तये संस्कृताध्ययनस्य प्रयोजनवत्तां प्रति न मतद्वैधमस्ति।

४९१. दिवं च पृथिवीं चान्तरान्तरिक्षम्।

४९२. अयमतिसारकी, अस्मै लङ्घनं हितम्। रुचिश्चेत्स्यात्तरलं कृशरं मात्रयोपयुञ्जीत।

४९३. न हि मनस्विनो धनात् प्रति यच्छन्ति मानम्।

४९४. ऋद्धिमती बन्धुमती चापीयमशिश्वी मा जीवन्ती द्रावयति चेतांसि सचेतसामवलोककानाम्।

४९५. धानुष्काणां पार्थो वरो बभूव, आसिकानां नकुलः, शाक्तीकानां च सहदेवः।

४९६. आ हिमाचलादा च कन्यान्तरीपात् समुद्रमेखलायामस्यामिलायामध्यशोकः पुराऽभूत्।

---

४९०. मतद्वैधम्—मतस्य द्वौ प्रकारौ। द्वि-त्र्योश्च धमुञ्' (५।३।४५) से 'धा' के स्थान में विकल्प से धमुञ् आदेश होता है। 'धमुञन्तात्स्वार्थे ड-दर्शनम्' इस वचन से ड प्रत्यय हुआ।

४९१. अन्तरा—'अन्तरान्तरेण युक्ते' (२।३।४) से दिवम् और अन्तरिक्षम् में द्वितीया हुई। अन्तरा=मध्ये।

४९२. अतिसारकी—अतिसारोऽस्त्यस्य। 'वातातिसाराभ्यां कुक् च' से कुक् आगम होता है और 'इनि' प्रत्यय। उपयुञ्जीत—'प्रोपाभ्यां युजेरयज्ञपात्रेषु' (१।३।६४) से आत्मनेपद का नियम है। युजिर् योगे उभयपदी है।

४९३. धनात् प्रति—'प्रतिः प्रतिनिधिप्रतिदानयोः' (१।४।९२) से प्रतिदान (बदले में देना) अर्थ में 'प्रति' कर्मप्रवचनीय होता है और इस के योग में 'प्रतिनिधिप्रतिदाने च यस्मात्' (२।३।११) से पंचमी होती है।

४९४. अशिश्वी—'सख्यशिश्वीति भाषायाम्' (४।१।६२) से 'नास्ति

४८९. मैं तुम्हारे अभिप्राय को समझ नहीं सका, खोल कर कहिये।

४९०. हिन्दुसंस्कृति के बोध के लिये संस्कृताध्ययन सार्थक है इसमें मतभेद नहीं।

४९१. द्युलोक और पृथिवी लोक के बीच में अन्तरिक्ष है।

४९२. इसे अतिसार (दस्त) लगे हुए हैं, इस के लिये अनशन अच्छा है। यदि रुचि हो तो थोड़ी सी पतली खिचड़ी ले ले।

४९३. उन्नत मन वाले धन के बदले में मान को नहीं देते।

४९४. समृद्धि और बन्धुओं के होने पर सन्तान-हीन निन्दित (=धिक्कृत=दुःखमय) जीवन व्यतीत करती हुई इस स्त्री को देखने वाले सहृदय लोगों के हृदय पसीज जाते हैं।

४९५. धनुर्धारियों में अर्जुन, तलवार चलाने वालों में नकुल और बर्छी चलाने वालों में सहदेव सब से उत्तम था।

४९६. हिमालय से लेकर कन्याकुमारी तक इस सारी पृथिवी पर महाराज अशोक का अधिकार था।

शिशुरस्याः' इस अर्थ में निपातन किया है। अर्थात् लोक में इस अर्थ में 'अशिशुः' प्रयोग अशुद्ध होगा। मा जीवन्ती—'माङ्याक्रोशे' इस वार्तिक से लट् के स्थान में शतृ होता है। आत्मनेपदी धातु से 'शानच्' भी होगा। मा जीवन्ती=गर्हितं जीवन्ती (कष्ट से जीती हुई)। अव-लोकक:—अव पूर्वक 'लोकृ दर्शने' से ण्वुल्।

४९५. धानुष्काणाम्—धनुः प्रहरणमेषां ते, तेषाम्। 'प्रहरणम्' (४।४।५७) से ठक् प्रत्यय होता है। इस ठक् को 'इसुसुक्तान्तात्कः' (७।३।५१) से 'क' आदेश होता है। आसिकानाम्—यहाँ भी इसी अर्थ में ठक् हुआ है। शाक्तीकानाम्—यहाँ इसी अर्थ में 'शक्तियष्ट्योरीकक्' (४।४।५९) से ईकक् प्रत्यय हुआ है।

४९६. आ हिमाचलात्, आ कन्यान्तरीपात्—यहाँ दोनों जगह आङ् अभिविधि में है। अर्थ है हिमालय और कन्यान्तरीप को व्याप्त करके।

४९७. अहो गर्धोऽस्य लोकस्य । एकोऽपरमर्थाद् वञ्चयितुमीहते ।

४९८. यावदेवाहं तत्रागां तावदेव वृत्तमनुसमधाम्, अबुधं चाभियुक्ता अनागस इति ।

४९९. अहं त्वामसकृदवोचं नाहं मनोऽन्यथयितुं पारये इति ।

५००. आदित्यः पुरस्तादुदेति पश्चादस्तमेतीति मिथ्या कल्पना । न हि तस्योदयास्तमयौ स्तः ।

५०१. कच्चित्कुशली तातः सुखिनी वाऽम्बा ।

५०२. षण्मासजात एष शिशुः । अस्मिन्नपूर्वः कोऽपि परिस्पन्दः ।

५०३. मालाकार ! उत्तमगन्धाढ्या उपत्राः स्रजो मे ग्रथान ।

इलायाम्—पृथिव्याम् । 'गोभूवाचास्त्विडा इलाः'—नानार्थवर्ग में अमर । इलायामधि—कर्मप्रवचनीय अधि शब्द स्वस्वामिसम्बन्ध में प्रयुक्त होता है । इस के योग में कभी स्वामी से सप्तमी आती है, कभी स्व से । यहाँ स्व (=इला) से सप्तमी हुई है ।

४९७. अर्थात्—वञ्चन का अर्थ है दूसरे को चतुराई से उस के धन से पृथक् करना । सो यहाँ अपाय है । अपाय की अवधि 'अर्थ' है । अतः इस से अपादान में पञ्चमी हुई ।

४९८. अगाम्—इण् का लुङ् । अनुसमधाम्—अनुसम् पूर्वक धा धातु का लुङ् । सिच् का लुक् । अबुधम्—बुधिर् बोधने भ्वा० उ० का लुङ् । इरित् होने से अङ् ।

४९९. अन्यथयितुम्—अन्यथाकर्तुम् । तत्करोति तदाचष्टे इति णिच् ।

५००. पुरस्तात्—पूर्वस्यां दिशि । 'दिक्शब्देभ्यः सप्तमीपञ्चमीप्रथमाभ्यो दिग्देशकालेष्वस्तातिः' (५।३।२७) से सप्तम्यन्तपूर्वशब्द से 'अस्ताति' प्रत्यय होता है । 'अस्ताति च' (५।३।४०) से 'पूर्व' को 'पुर्' आदेश होता है ।

४९७. अहो लोगों में कितना लालच है। एक दूसरे के धन को ठगना चाहता है।

४९८. ज्यों ही मैं वहाँ पहुँचा त्यों ही मैं ने वृत्तान्त की पड़ताल की और यह जाना कि दोष से लाञ्छित लोग निरपराध हैं।

४९९. मैंने तुम से बार-बार कहा कि मैं अपने विचार को बदल नहीं सकता।

५००. सूर्य पूर्व में उदित होता है और पश्चिम में अस्त होता है, यह मिथ्या कल्पना है। वस्तुतः उसका न उदय होता है और न अस्त।

५०१. मैं आशा करता हूँ पिता जी और माता जी राज़ी-खुशी हैं।

५०२. यह छः महीने का बच्चा है। इस में अपूर्व स्फूर्ति है।

५०३. हे माली, उत्तम गन्धयुक्त कोई तीन मालाएँ मेरे लिये गूँथो।

पश्चात्—अपरस्यां दिशि। 'अस्ताति' के अर्थ में 'पश्चात्' (५।३।३२) से निपातन किया है। उदयास्तमयौ—अस्तमयः=अस्तंगमनम्। 'अस्तम्' यह मकारान्त अव्यय है। हाँ 'अस्ताचल' में 'अस्त' अदन्त पुँ० है। यह पर्वत का नाम है।

५०१. कच्चित्—'कामप्रवेदन=इच्छा प्रकट करना' अर्थ में प्रयुक्त होता है। तात्पर्य में 'इष्ट-परिप्रश्न' में प्रयुक्त देखा जाता है। माता-पिता का कुशल उसे इष्ट है, तद्विषय में पूछता है।

५०२. षण्मासजातः—षण् मासा जातस्यास्य। 'कालाः परिमाणिना' (२।२।५) से तत्पुरुष समास होता है। इसी सूत्र पर पढ़े हुए 'उत्तरपदेन परिमाणिना द्विगोः सिद्धये बहूनां तत्पुरुषस्योपसंख्यानम्' इस वार्तिक से त्रिपद तत्पुरुष होता है, और सभी तत्पुरुष द्विपद होते हैं। द्वे अहनी जातस्य यस्य स द्व्यह्नजातः।

५०३. उपत्राः—त्रयाणां समीपे ये वर्तन्ते ते, ततः स्त्रीत्वविवक्षा में 'उपत्र' शब्द से टाप्। 'उपत्रि' से 'बहुव्रीहौ संख्येये डजबहुगणात्' (५।४।७३) से डच् समासान्त होता है।

५०४. मेधावी क्षिप्रं स्मरति चिरं च धारयति ।

५०५. सूचिभेद्ये नैशे तमसि गच्छतां नः पदानि विषमीभवन्ति ।
५०६. अभ्यागारिक एव तपस्वी कार्यान्तराण्यात्ययिकान्यपि कर्तुं कालं न लभते ।
५०७. नाऽस्य जन्मनः खालित्यम् । इदं ह्यस्येन्द्रलुप्तकं कालिक्या रुजा समजनि ।
५०८. पिपासुना नादेयं जलं नादेयम् । न हि स्यन्दत इत्येतावता सर्वं पाथः पेयं भवति ।
५०९. स मे प्रातिवेश्यो न भवति, यद्यप्यारातीयः ।
५१०. न केवलमसावधार्मिको भवत्याधर्मिकोऽपि ।
५११. सर्वंपथीनाऽस्य धिषणा । धुर्योऽयं विदुराणाम् ।
५१२. अलमतिविस्तरेण, समासेनोच्यताम् ।

---

५०५. सूचिभेद्ये—सूच्या भेद्ये । ऐसा कहने में अन्धकार की घनता अभिप्रेत है । भर्तृहरि ने सुभाषितत्रिशती में इसी अर्थ में 'असूचिसंचारे' ऐसा प्रयोग किया है ।

५०६. अभ्यागारिकः—अभितोऽगारे भवः । आत्ययिकानि—अत्ययो विनाशः प्रयोजनमेषाम्, विलम्बासहानीत्यर्थः । 'प्रयोजनम्' (५।१।१०९) से ठञ् प्रत्यय होता है ।

५०७. खालित्यम्—खलितस्य भावः । ष्यञ् । कालिक्या—प्रकृष्टः कालोऽस्या इति कालिकी । 'प्रकृष्टे ठञ्' (५।१।१०८) से ठञ् प्रत्यय होता है । स्त्रीत्व विवक्षा में ङीप् ।

५०८. नादेयं जलम्—नद्यां भवं नादेयम् । 'नद्यादिभ्यो ढक्' (४।२।९७) से शैषिक ढक् प्रत्यय होता है । नादेयम्—न आदेयम् । आङ् दा से 'अचो यत्' (३।१।९७), ईद् यति' (६।४।६५) से रूप-सिद्धि होती है ।

५०४. जो मेधावी होता है वह शीघ्र स्मरण कर लेता है और चिर तक स्मरण रखता है।

५०५. गाढ अन्धकार में चलते हुए हमारे पाओं लड़खड़ा जाते हैं।

५०६. कुटुम्ब-पालन में आसक्त यह बेचारा गृहस्थ अत्यावश्यक कार्यों को करने के लिये भी समय नहीं पाता।

५०७. यह इस का गंज जन्म से नहीं, यह तो चिर-रोग के कारण हुआ है। इसे इन्द्रलुप्तक कहते हैं।

५०८. पिपासु को नदी का जल नहीं पीना चाहिये। सभी पानी बहने के कारण से ही पीने योग्य नहीं हो जाता।

५०९. वह मेरा अनन्तरगृहवासी पड़ोसी नहीं, यद्यपि पड़ोस में रहता है।

५१०. यही नहीं कि वह धर्म नहीं करता, अधर्म भी करता है।

५११. इस की बुद्धि सर्वतोगामिनी है। यह विद्वानों में सर्वश्रेष्ठ है।

५१२. बहुत विस्तार न कीजिये, संक्षेप से कहिये।

---

५०९. प्रातिवेश्यः—प्रतिवेशे भवः = प्रतिवेश्यः, स एव प्रातिवेश्यः। स्वार्थेऽण्। आरातीयः—आराद्भवः। वृद्धाच्छः।

५१०. अधार्मिकः—धर्मं चरतीति धार्मिकः। न धार्मिकः=अधार्मिकः। नञ्समास। आधर्मिकः—'अधर्माच्चेति वक्तव्यम्' इस वार्तिक से अधर्मं चरतीति। इस विग्रह वाक्य के आश्रित तद्धित प्रत्यय की उत्पत्ति होती है। अधर्म = पाप।

५११. सर्वपथीना—'तत्सर्वादेः पथ्यङ्गकर्मपत्रपात्रं व्याप्नोति' (५।२।७) से 'ख' प्रत्यय होता है। सर्वान्पथो व्याप्नोति। विदुराणाम्—'विदिभिदिच्छिदेः कुरच्' (३।२।१६२) से विद् (जानना) से ताच्छील्य अर्थ में कुरच् प्रत्यय।

५१२. अलम् = न। अलं भूषणपर्याप्तिशक्तिवारणवाचकम्—अमर। अतिविस्तरेण—यहाँ करण में तृतीया हुई है। गम्यमान क्रिया सिध्यति आदि का 'अतिविस्तर' करण है।

५१३. अस्यागारस्यायामं विस्तारं च तावदवैमि । कियान-
स्योच्छ्राय इति न वेद्मि ।
५१४. विद्यासंस्कृता अपि दुर्जनाः संचक्ष्याः । वाङ्मात्रेणापि ते
नार्च्याः ।
५१५. अस्ति मे पारिणाह्यं वाह्यं वह्यं नास्ति ।
५१६. वञ्च्यं वञ्चन्ति वणिजः ।
५१७. कथमहमात्मनो दुःखमपकर्षामि सुखं च प्रकर्षामि ?
५१८. आयुष्यः सायम्प्रातिको विहारः । कोत्र सांशयिकः ?

५१९. अमण्डितभद्रेण वेषेण तमहं छात्रं पश्यामि कमण्डलुना च ।

५२०. ये पराभ्युदये सेर्ष्यास्ते मूढाः । न तेषां सुखसंवित्तिरस्ति ।

५२१. कार्यतात्पर्यं ते स्तवीमि सारल्यं च । गुरुषु विनय-
स्तेऽभ्यधिको गुणः सुभगंकरणः ।

५२२. *किं हरिणका अपि केसरिणः प्रार्थयन्ते ।
५२३. एष कार्यभारो मम । तथापीमं प्रयतिष्ये घटयितुम् ।

---

५१४. संचक्ष्याः—वर्जनीयाः । चक्षिङ् को यहाँ ख्याञ् आदेश नहीं होता । 'वर्जने प्रतिषेधो वक्तव्यः' यह वार्तिक निषेध करता है ।

५१५. वाह्यम्—वह्—ण्यत् । वह्यम्—'वह्यं करणम्' (३।१।१०२) से करण अर्थ में यत् प्रत्यय होता है । वहत्यनेन इति वह्यं शकटम् ।

५१६. वञ्च्यम्– वञ्चु चञ्चु तञ्चु इत्यादि दण्डक पठित धातु वञ्च् गत्यर्थक है । वञ्च्यम् = गन्तव्यम् ।

५१८. आयुष्यः—आयुषे हितः । सायम्प्रातिकः—सायम्प्रातर्भवः । कालाट्ठञ् । 'अव्ययानां भमात्रे टिलोपः' से 'प्रातर्' के टि 'अर्' का लोप ।

५१३. इस कमरे की लम्बाई और चौड़ाई तो मैं जानता हूँ, ऊँचाई कितनी है, यह नहीं जानता।

५१४. दुर्जन चाहे विद्याविभूषित हो तो भी उस का परित्याग करना चाहिये, वाणी मात्र से भी उस का आदर नहीं करना चाहिये।

५१५. मुझे घर का सामान ढोना है, वाहन नहीं है।

५१६. बनिये अपने गन्तव्य स्थान को जा रहे हैं।

५१७. मैं अपने दुःख को कैसे कम करूँ और सुख को कैसे बढ़ाऊँ?

५१८. प्रातः व सायं की सैर आयुवृद्धि के लिये हितकर है। इस में किसे सन्देह है?

५१९. बिना सजावट सुन्दर वेष से तथा कमण्डलु से पहचानता हूँ कि वह छात्र है।

५२०. जो दूसरों के अभ्युदय में ईर्ष्या करते हैं वे मूर्ख हैं, उन्हें सुख का अनुभव नहीं होता।

५२१. मैं तेरी कार्य में लगन और सरलता की सराहना करता हूँ। गुरुओं के प्रति नम्रता यह एक अधिक गुण है जो तुझे सुन्दर बना रहा है।

५२२. क्या (कभी) हिरनों के बच्चे भी सिंहों पर धावा करते हैं?

५२३. यह कार्य मेरे लिये दूभर है, तो भी इसे करने का यत्न करूँगा।

सांशयिकः—संशयापन्नमानसः—अमर। 'संशयमापन्नः' (५।१।७३) से ठञ्।

५२१. कार्यतात्पर्यम्। तत्परम् अस्येति तत्परः, तस्य भावः तात्पर्यम्। ष्यञ्। कार्ये तात्पर्यम्। स्तवीमि—'तुरुस्तुशम्यमः—' (७।३।९५) से ईट् का आगम विकल्प से होता है। सुभगंकरणः—'आढ्यसुभगस्थूलपलितनग्नान्ध-प्रियेषु—' (३।२।५६) से च्व्यर्थ में ख्युन् प्रत्यय होता है। असुभगः सुभगः क्रियतेऽनेनेति।

५२३. कार्यभारः—भारभूतं कार्यम्। भारी काम, मुश्किल काम। घटयितुम्—घट चेष्टायाम् भ्वा० आ० अकर्मक है, अतः 'साधना' अर्थ में

५२४. ब्रह्मचारिभिरुल्बण आकल्पो न कल्पनीयः, न च परिकर्मणि कालः क्षपणीयः।

५२५. अहो अस्य प्रणयप्राग्भारः सगन्धेषु। सोऽप्यगृह्यमाणकारणः।

५२६. मनुष्या हि किञ्चित्स्ववशात् कुर्वन्ति, किञ्चित्कर्मवशात्।

५२७. अशितानशितेन जीवति। कदाचिद् द्व्यहात्यासं भुङ्क्ते कदाचित् त्र्यहात्यासम्।

५२८. अयं नो बन्धुर्विपश्चिदिति बहुमानमर्हति कापुरुष इत्यवधीरणाम्।

५२९. अद्यश्वीना परीक्षा, त्वं चैवमुदास्से तत्कथं युज्यते?

५३०. स्वयमयतात्मा स कथंकारमन्यान्विनयेत्? य आत्मना चक्षुर्विकलः स नान्यान्मार्गमादिशेत्।

५३१. कस्यानुमतेऽगमः? नातः परं गुरुमननुमान्य बहिरगारं गमनीयम्।

णिच् का प्रयोग किया गया है। आकल्पः—वेषः। आकल्पवेषौ नेपथ्यम्—अमर। परिकर्मणि—परिकर्माङ्गसंस्कारः—अमर। प्रणयप्राग्भारः—प्रणयस्य प्राग्भारः। प्रणयः=प्रेमा। प्रणयास्त्वमी। विस्रम्भयाच्ञाप्रेमाणः—अमर। प्राग्भारः=पर्वत का ढलान, मन का झुकाव। उपचार से 'प्राग्भार' का प्रयोग 'राशि', 'संघात', 'अतिशय' अर्थ में होता है। सगन्धेषु—बन्धुषु। अगृह्यमाणकारणः—गृह्यमाणं कारणं यत्र सः, स न भवति। कारण=प्रयोजन।

५२६. स्ववशात्—वशः=इच्छा। इसका मूलार्थ यही है। वश् अदादि प० से 'वशिरण्योरुपसंख्यानम्' से अप् प्रत्यय होता है।

५२७. अशितानशितेन—अशितं च तद् अनशितं च। 'क्तेन नञ्वि-

५२४. ब्रह्मचारियों को भड़कीला पहरावा नहीं पहनना चाहिये, और न ही सजावट में समय खोना चाहिये ।

५२५. अहो इसका अपने बन्धुओं में कितना बढ़ा-चढ़ा प्रेम है, और वह भी निष्कारण ।

५२६. मनुष्य कुछ तो अपनी इच्छा से करते हैं, और कुछ पूर्वकर्म (दैव) के कारण ।

५२७. खाए और बिना खाए जीता है । कभी दो दिन छोड़ कर खाता है, कभी तीन दिन ।

५२८. यह हमारा बन्धु विद्वान् होने से आदर का पात्र है, कुत्सित पुरुष होने से तिरस्कार का ।

५२९. परीक्षा निकट आ रही है, तू ऐसे उदासीन है, यह कैसे उचित है ?

५३०. जिस ने अपने मन को वश में नहीं किया है वह दूसरों को कैसे विनीत बनाए । जो स्वयम् अन्धा है वह दूसरों को कैसे मार्ग दिखा सके ?

५३१. किस की अनुज्ञा से गये थे ? आगे को बिना गुरु की अनुमति प्राप्त किये कमरे से बाहिर मत जाना ।

शिष्टेनानञ्' (२।१।६०) से समानाधिकरण समास होता है । द्व्यहात्यासम्—द्व्यहमत्यस्य । 'अस्यतितृषोः क्रियान्तरे कालेषु' (३।४।५७) से णमुल् ।

५२९. अद्यश्वीना—आसन्ना । 'अद्यश्वीनाऽवष्टब्धे' (५।२।१३) से निपातन किया गया है । इस सूत्र में कई लोग पूर्व सूत्र से 'विजायते' की अनुवृत्ति नहीं करते, अवष्टब्धमात्र (=आसन्नमात्र) में निपातन मानते हैं, तदनुसार यह प्रयोग है । अन्यथा अद्यश्वीना गौः, अद्यश्वीना वडवा (=जो आजकल वियाने वाली है)—ऐसा प्रयोग ही उपपन्न होगा । उदास्से—उद् पूर्वक आस उपवेशने का लट् म० पु० एक० ।

५३०. कथंकारम्—'अन्यथैवंकथमित्थंसु सिद्धाप्रयोगश्चेत्' (३।४।२७) से णमुल् । कृ धातु का यहाँ कुछ अर्थ नहीं ।

५३२. महानगरेषु क्वचिद् वैद्युतः प्रकाश इति दिवामन्या रात्रयः, क्वचिदप्रकाशानि गृहाणीति रात्रिम्मन्यान्यहानि ।

५३३. रत्ननिधायं निदधाति पुस्तकमुपाः, प्रतिजागर्ति च स्वस्योपकरणान्तरे ।

५३४. अतप्तमश्रृतं पयः कालान्तरं न क्षमते । तस्माच्छ्रपयैतत् ।

५३५. किं स्वयमेव संस्करोषि भक्ष्यम् ? न हि सूदेन सँस्स्कारयामि ।

५३६. सम्प्रति किंसमाचारास्ते पितृचरणाः ? अहमस्मि तान्दिदृक्षुः ।

५३७. ब्रुडतो हि कुशं वा काशं वाऽवलम्बनम् ।

५३८. यो जागर्ति स इष्टेन संप्रयुज्यते, यो निद्राति स तद्धापयति ।

५३९. त्वया स्वहस्तेनैवाङ्गाराः कर्षिताः, यत्त्वं प्रत्यक्षं विकुर्वाणमपि सुतं लालनावशो भूत्वा नावारयः ।

---

५३२. दिवामन्याः—दिवाऽऽत्मानं मन्यन्त इति । यहाँ 'दिवा' अव्यय है अतः 'मुम्' का आगम नहीं हुआ और ह्रस्व भी नहीं हुआ । 'खित्यनव्ययस्य' (६।३।६६) अनव्यय पूर्वपद को ह्रस्व करता है और 'अरुर्द्विषद्—' (६।३।६७) अनव्यय अजन्त पूर्वपद को मुम् करता है ।

५३३ रत्ननिधायम्—'उपमाने कर्मणि च' (३।४।४५) से णमुल् हुआ है । रत्ननिधायम् = रत्नमिव ।

५३४. श्रपय—श्रा पाके घटादि है । अतः यह 'मित्' है । णिच् होने पर पुक् का आगम होने पर 'मितां ह्रस्वः' (६।४।९२) से ह्रस्व होता है ।

५३५. सँस्स्कारयामि—'संपरिभ्यां करोतौ भूषणे' (६।१।१३७) से भूषण अर्थ में सुट् का आगम होता है । इस पर वृत्तिकार का वचन है—'संपूर्वस्य क्वचिदभूषणेऽपि सुडिष्यते संस्कृतमन्नमिति' । 'समः सुटि' (८।३।५) से 'सम्' के 'म्' को रु होता है । 'अत्रानुनासिकः पूर्वस्य तु वा' (८।३।२) से

५३२. बड़े शहरों में कहीं बिजली का प्रकाश होने से रातें दिन मालूम पड़ती हैं और कहीं अन्धेरे घर होने से दिन भी रातें।

५३३. उषा रत्न की तरह पुस्तक को रखती है, और अपनी दूसरी साधन सामग्री का भी ख्याल रखती है।

५३४. बिन पकाए दूध बहुत देर तक नहीं ठहरता, अतः इसे पका लो।

५३५. क्या तुम खाना आप तैयार करते हो? नहीं, रसोइये से पकवाता हूँ।

५३६. इस समय तुम्हारे पिता जी क्या कर रहे हैं? मैं उन से मिलना चाहता हूँ।

५३७. डूबते को तिनके का सहारा।

५३८. जो जागत है सो पावत है जो सोवत है सो खोवत है।

५३९. तुम ने अपने हाथों अपना नाश किया है जो अपने सामने बिगड़ते हुए अपने पुत्र को लाड़-प्यार के अधीन होकर रोका नहीं।

विकल्प से 'रु' से पूर्व को अनुनासिक होता है। 'संपुंकानां सो वक्तव्यः' इस वार्तिक से रुस्थानिक विसर्जनीय के स्थान में नित्य 'स्' होता है। संस्करोमि—'समो वा लोपमेके' इस भाष्य-वचन के अनुसार 'रु' का लोप होने पर अनुस्वार अथवा अनुनासिक सहित एक सकार वाला रूप।

५३६. किंसमाचाराः—कः समाचारः (=आचरणं=क्रिया) एषां ते। बहुव्रीहि।

५३७. कुशं वा काशं वा—कुश और काश पुन्नपुंसक हैं। कुशः कुशम्। काशः काशम्।

५३८. संप्रयुज्यते—युज समाधौ दिवा० आ०। यह अकर्मक है। उपसर्गवश अर्थान्तर हुआ। तद्धापयति—तद् हापयति। यहाँ हापयति= जहाति। साहित्य में 'हा' से स्वार्थ में णिच् बहुत बार प्रयुक्त हुआ है।

५३९. विकुर्वाणम्—'अकर्मकाच्च' (१।३।३५) से विपूर्वक अकर्मक कृ से आत्मनेपद का नियम है।

५४०. न हि कण्टकान्सुमनसो व्यभिचरन्ति । न हि सुखं दुःखेनासंभिन्नमस्ति । न हि सम्पदो विपद्भिरननुस्यूताः सन्ति । तस्माद् व्यापदो विसोढुं सज्जेत् ।

५४१. व्यपदेशमाविलयतस्तेऽजननिर्भूयात् ।

५४२. निकेतनाद्बहिर्मा यासीः, मा ते शैत्यविक्रिया भूत् ।

५४३. उपाध्यायः पर्यन्वयुङ्क्त शिष्यान् किं गङ्गा यमुनामुपतिष्ठते, उत यमुना गङ्गामिति ।

५४४. सम्प्रत्यनध्यायदिवसाः । अव्यापृतस्य मे नातियाति कालः ।

५४५. मा तेऽरातिः प्रतिष्ठात् । अन्यथाऽसौ तेऽतिवेलं कष्टदो भविष्यति ।

५४६. अवचूर्ण्यतेऽयं गोधूमः, एष साधीयश्चूर्ण्यताम् ।

५४७. व्रणः पूयक्लिन्नो बद्धमुखश्च जातः । इदानीमस्य शालाक्यं करिष्यते ।

५४८. साधुरधमर्णं बाधते, वराक ऋणार्णं कुरुते ।

---

५४०. सुमनसः—सुमनस् (फूल) प्रायः बहुवचन में प्रयुक्त होता है और नियत स्त्रीलिङ्ग है । असंभिन्नम्—सम्पूर्वक भिद् धातु का अर्थ मिलाना, जोड़ना होता है । गङ्गायमुनयोः सम्भेदः । उपसर्गकृत अर्थवैचित्र्य के लिये हमारी कृति 'उपसर्गार्थचन्द्रिका' देखो । अननुस्यूताः—षिवु तन्तुसन्ताने दिवा० प० का निष्ठा में 'स्यूत' रूप होता है, अर्थ है सीया हुआ । अनुस्यूत=साथ जकड़ा हुआ, बन्धा हुआ । विसोढुम्—'सोढः' (८।३।११५) से मूर्धन्यादेश का निषेध होगया । 'परिनिविभ्यः सेवसितसय'—(८।३।७०) से प्राप्त था ।

५४१. अजननिः—'आक्रोशे नञ्यनिः' (३।३।११२) से धिक्कार अर्थ में नञ्पूर्वक धातुमात्र से 'अनि' प्रत्यय होता है ।

५४०. (गुलाब के) फूल विना काँटे के नहीं होते। दुःख से अमिश्रित सुख नहीं मिलता। ऐसी सम्पत्ति नहीं जो विपत्ति से अनुबद्ध न हो, इसलिये विपत्तियों को सहने को तैयार रहे।

५४१. कुल को कलङ्कित करने वाले तेरे जैसे का जन्म न हो।

५४२. घर से बाहिर मत जा, ऐसा न हो तुझे ठण्ड लग जाय।

५४३. गुरु ने शिष्यों से पूछा, क्या गङ्गा यमुना में जा मिलती है अथवा यमुना गङ्गा में।

५४४. आज-कल विद्यालय में छुट्टियाँ हैं, खाली समय नहीं कटता।

५४५. तेरा शत्रु जमने न पाय, नहीं तो वह तुझे बहुत कष्ट देगा।

५४६. गेहूँ मोटा पिस रहा है, इसे बारीक पीसिये।

५४७. फोड़े में पीप पड़ गई है और मुँह बन गया है। अब इसे सुई से फाड़ दिया जायगा।

५४८. साहू ऋणी को तंग करता है, बेचारा ऋण चुकाने के लिये और ऋण लेता है।

---

५४३. पर्यन्वयुङ्क्त—परि अनुयुज् का लङ्। अनुयुज् प्रश्नार्थक है।

५४५. मा प्रतिष्ठात्—माङ् उपपद होने पर प्रति उपसर्ग होने पर स्था का लुङ्। 'गातिस्था—' (२।४।७७) से सिच् का लुक्। अतिवेलम्= भृशम्। अतिवेलभृशात्यर्थातिमात्रोद्गाढनिर्भरम्—अमर।

५४६. अवचूर्ण्यते—यहाँ 'अव' चूर्णभाव की न्यूनता को कहता है। जैसे 'अवदग्ध' (अधजला) में दाह की अपरिपूर्णता को।

५४७. शालाक्यम्—शलाकाकर्म। ष्यञ्।

५४८. साधुः—साधुर्वार्धुषिके चारौ सज्जने चाभिधेयवत्—विश्व। अधमर्णम्—अधम ऋणे इति अधमर्णः। ऋणार्णम्—यहाँ 'प्रवत्सतरकम्बल—' इस वार्तिक से वृद्धि होती है। ऋणस्यापनयनाय यदन्यद् ऋणं क्रियते तदृणार्णम्।

५४९. एकमेवार्थमनुलपसि नार्थान्तरमभिधत्से, न चान्यं शृणोषि ।

५५०. शय्योत्थायं पिबन्ति फाण्टं नव्याः ।

५५१. इदं मे चित्तमुत्पन्नं प्रहारं प्रहारं तं क्षुणद्मीति ।

५५२. भद्र ! नहि समे समानशीला भगवता सृष्टाः । सन्ति चेहोभये सुजनाश्च दुर्जनाश्च ।

५५३. मुष्टिमेयं तमोऽभूत्, एकोऽपरं नान्वभूत् ।

५५४. हिन्दुश्च संस्कृतानभिज्ञश्चेति विप्रतिषिद्धमिति प्रतीच्या अपि विद्वांसः किमुत प्राच्याः ।

५५५. कामं युज्यस्व सखीभिः संव्यवहरस्व च, समुज्ज्वलं वा नेपथ्यं कुरु । नाहं वारयामि । परं वित्तं वित्तमिति कृत्वा समुत्सृज ।

५५६. अद्य प्रातस्तरामेवोदेष्यत्ययः । प्रभूतार्थलब्धिं भवित्रीमुत्पश्यामि ।

५५७. आभोगवत्सु निकर्षणेषु यदा परिक्रमिष्यसि, शाद्वलानि क्षेत्राणि, हरितः शाखिनः, स्यन्दमाना अपश्च द्रक्ष्यसि तदा तर्प्स्यति तेऽन्तरङ्गम् ।

---

५४९. अनुलपसि—अनुलापो मुहुर्भाषा—अमर ।

५५०. शय्योत्थायम्—शय्यायाः समुत्थाय । यहाँ त्वरा (अनन्तर कर्तव्य में विलम्ब का अभाव) गम्यमान है ।

५५१. क्षुणद्मि—क्षुदिर् संचूर्णने रुधादि ।

५५२. समे—सम शब्द सर्व-पर्याय सर्वनाम है । 'जसः शी' (७।१।१७) से 'जस्' के स्थान में 'शी' होता है ।

५५३. मुष्टिमेयम्—मुष्ट्या (मुष्टिना वा) मेयम् । जो मुट्ठी से मापा जा सके । अन्वभूत्—अनुभू का अर्थ जानना, पहचानना है ।

५४९. एक ही बात को दोहरा रहे हो, नया कुछ नहीं कहते हो और न ही दूसरे की सुनते हो।

५५०. बिस्तरे से उठते ही आजकल लोग चाय का सेवन करते हैं।

५५१. मेरे जी में आया कि मार मार कर इस का कचूमर निकाल दूँ।

५५२. साधो, भगवान् ने सभी को समानस्वभाव वाला नहीं रचा। यहाँ सज्जन और दुर्जन दोनों हैं।

५५३. गाढ अन्धकार था, एक पुरुष दूसरे को देख नहीं पाता था।

५५४. हिन्दू हो और संस्कृत से अनभिज्ञ हो, यह परस्पर विरोधी बात है ऐसा पश्चिमी विद्वान् भी मानते हैं, पूर्वी विद्वानों का तो क्या कहना।

५५५. सखियों से खूब मिलो, उनके साथ लेन-देन करो। शुभ्र वस्त्र धारण करो, मैं मनाही नहीं करता, पर रुपये को रुपया समझ कर खर्च करो।

५५६. आज पौ फटते ही भाग्य उदय होगा। मुझे सूझ रहा है बहुत धन प्राप्त होगा।

५५७. जब तू खुले मैदानों में घूमेगा, हरे-भरे खेतों, हरे वृक्षों तथा बहते हुए जल को देखेगा, तो तेरा मन तृप्त हो जायगा।

---

५५४. प्रतीच्याः— 'द्युप्रागपागुदक्प्रतीचो यत्' (४।२।१०१) से यत् प्रत्यय शैषिक होता है। प्रतीचि भूभागे भवः=प्रतीच्यः।

५५५. वित्तं वित्तमिति कृत्वा—यहाँ कृत्वा=बुद्ध्वा। कृ धातु के नाना अर्थों के जानने के लिये हमारी कृति 'प्रस्तावतरङ्गिणी' में 'करोतिना सर्वधात्वर्थानुवादः क्रियते' इस निबन्ध को पढ़िये।

५५६. प्रातस्तराम्—यहाँ तरबन्त 'प्रातस्तर' शब्द से अद्रव्यप्रकर्ष में 'आमु' प्रत्यय होता है। काल वस्तु यद्यपि द्रव्य है तथापि काल के प्रातरादि कल्पित विभाग द्रव्य नहीं हैं। अयः—सौभाग्यम्। अयः शुभावहो विधिः—अमर।

५५८. नक्तं तमसि रोचिष्णून्युडूनि सम्प्रति मन्दरुचीनि सन्ति तिरोहितानि ।

५५९. मामिह संनिधाप्य मानो मे ग्लानिं नीत इति यत्सत्यं शत्रूयितं त्वया मयि ।

५६०. सङ्क्रामन्ति रोगाः । संक्रमणे च पुरुषस्य पुरुषान्तरेण संसर्गः कारणतामियर्ति वातश्चासेव्यमानः ।

५६१. यद्गुरु तन्निषीदति यल्लघु तदुत्प्लवते ।

५६२. कोऽद्धा वेद यच्छ्वो भविता ?

५६३. कः कपाटमाहन्ति । अपि कश्चिदागन्तुः प्रतीहारमुपस्थितः ?

५६४. नाग्निं मुखेनोपधमेदित्यामनन्ति सूत्रकाराः ।

५६५. कदोद्वक्ष्यसि जनीम् ? कालोऽयं ते द्वितीयमाश्रममुपसंक्रमितुम् । जीर्यतश्च ते पितरौ ।

---

५५७. आभोगवत्सु---आभोगः परिपूर्णता । =विस्तार । निकर्षणेषु---संनिवेशो निकर्षणम्---अमर ।

५५८. रोचिष्णूनि---रोचनशीलानि । रोचनं दीप्तिः । 'अलंकृञ्निराकृञ्---' (३।२।१३६) से इष्णुच् प्रत्यय होता है । उडूनि---नक्षत्रमृक्षं भं तारा तारकाप्युडु वा स्त्रियाम्---अमर । इस वचन के अनुसार उडु नपुं० है और स्त्रीलिङ्ग भी ।

५५९. शत्रूयितं त्वया मयि---यहाँ 'अधिकरणाच्चेति वक्तव्यम्' इस वार्तिक से अधिकरणसप्तम्यन्त उपमानभूत शत्रु शब्द से क्यच् होता है आचार अर्थ में । अर्थ---त्वया शत्राविव मयि आचरितम् ।

५६०. इयर्ति---ऋ सृ गतौ जुहोत्यादि प० का लट् । यह धातु लोक

५५८. रात के अन्धेरे में चमकते हुए तारे अब मन्द-द्युति हो कर छिप गये हैं।

५५६. मुझे यहाँ बिठा कर तू ने मेरे मान की हानि की है, सच पूछो तू ने मेरे साथ वैर लिया है।

५६०. रोग एक से दूसरे को लग जाते हैं। इस संक्रमण में एक पुरुष का दूसरे के साथ स्पर्श कारण होता है और सेवन किया हुआ वायु भी।

५६१. जो चीज भारी होती है वह नीचे बैठ जाती है और जो हल्की होती है वह ऊपर उठ आती है।

४६२. कौन निश्चित रूप से जानता है कल क्या होगा?

५६३. कौन दर्वाज़ा खटखटा रहा है? क्या कोई आगन्तुक दर्वाजे पर खड़ा है?

५६४. अग्नि में मुख से फूँक न दे ऐसा सूत्रकार ऋषि कहते हैं।

५६५. कब विवाह करोगे? अब समय है कि तुम द्वितीय आश्रम में प्रवेश करो। और तुम्हारे माता-पिता भी बूढ़े हो रहे हैं।

में भी प्रयुक्त होती है।

५६१. उत्प्लवते—उद् पूर्वक प्लुङ् गतौ का रूप है। उपसर्ग के साथ इस का अर्थ उछलना, उभरना, तैरना होता है।

५६२. अद्धा—तत्त्वे त्वद्धाञ्जसा द्वयम्—अमर।

५६३. प्रतीहारम्—द्वाःस्थे द्वारि प्रतीहारः—अमर।

५६४. उपधमेत्—उप पूर्वक ध्मा शब्दाग्निसंयोगयोः भ्वा० प० का लिङ्।

५६५. उद्वक्ष्यसि—परिणेष्यसि। उद् वह् का लृट्। जनी=वधू। 'संज्ञायां जन्याः' (४।४।८२) इस सूत्र में जनी शब्द वधू पर्याय है। काशिकाकार का वचन है—जनी वधूरुच्यते।

५६६. वनीयकाः संपततो जनान्पणान् वन्वते ।
५६७. इयं शिशुः कन्दुकेन खेलन्ती मातुर्मनो हरति ।
५६८. क इमे ? इम आप्ताः ।
५६९. दृढं सज्जामहे संनिहितायै संस्कृतपरीक्षायै ।
५७०. अद्यत्वेऽनुपस्थितेभ्यः स्कूलच्छात्रेभ्य आणकं दण्डयन्ति ।

५७१. कूपस्य खानको मृद्भिरुपलिप्तमात्मानं तत एवोद्धृताभिरद्भिः शुन्धति ।
५७२. अधोऽधोऽधरं तिलकालकः ।
५७३. उपर्युपरि ते शिरो भ्रमति भ्रमरः ।
५७४. त्वां च मां चान्तरा महदन्तरम् । न केवलं जन्मना, विद्ययापि विशेषयामि त्वाम् ।
५७५. *सर्वतः सम्पदः सतः, परितः प्रपतन्ति दुष्कृतो विपदः ।

---

५६६. वनीयकाः—याचकाः । वनीयको याचनको मार्गणो याचकार्थिनौ—अमर । संपततः—सम्पूर्वक पत्—शतृ । संपततः = संचरतः । वन्वते—वनु याचने तनादि आ० ।

५६७. इयं शिशुः—यहाँ कोई भी स्त्रीप्रत्यय प्राप्त नहीं । साथ में प्रयुक्त हुए सर्वनाम 'इयम्' से 'स्त्रीत्व' का बोध होता है। ऐसे ही कपि, मुनि आदि शब्दों में भी कोई स्त्रीप्रत्यय नहीं होगा । अयं कपिः । इयं कपिः (वानरी) । अयं मुनिः । इयं मुनिः ।

५६८. आप्ताः—बन्धु, ज्ञाति । अन्यत्र आप्त = विश्वास्य ।

५६९. सजामहे—भाष्यकारप्रयोग-प्रामाण्य से आत्मनेपद साधु है । यथोत्तरं मुनीनां प्रामाण्यम् । ०परीक्षायै—'क्रियाग्रहणमपि कर्तव्यम्' इस वार्तिक से 'परीक्षा' की सम्प्रदान संज्ञा हुई ।

५७०. आणकं दण्डयन्ति—'दण्ड' धातु यहाँ ग्रहणार्थक है। द्विकर्मकता

५६६. भिखारी आते-जाते लोगों से पैसे मांगते हैं।

५६७. यह बच्ची गेन्द से खेलती हुई माता के मन को हरती है।

५६८. ये कौन हैं? ये अपने हैं।

५६९. हम निकट में होने वाली संस्कृत परीक्षा के लिये तैयार हो रहे हैं।

५७०. आजकल स्कूल में उपस्थित न होने वाले विद्यार्थियों से एक आना जुर्माना लेते हैं।

५७१. कूएँ का खोदने वाला मिट्टी से लथपथ हुए अपने आप को वहीं से निकले हुए जल से शुद्ध करता है।

५७२. निचले होंठ के ठीक नीचे काला तिल है।

५७३. तेरे सिर के जरा ऊपर भौंरा मँडरा रहा है।

५७४. तेरे और मेरे बीच बहुत अन्तर है। मैं न केवल जन्म से तुझ से उत्कृष्ट हूँ, विद्या से भी।

५७५. सज्जनों के चारों ओर सम्पदाएँ हैं, दुष्टों पर सब ओर से विपदाएँ आती हैं।

वैकल्पिक है, अतः अपादानत्व विवक्षा में 'छात्र' से पञ्चमी निर्दोष है।

५७१. खानकः—खनतीति। 'ण्वुल्तृचौ' (३।१।१३३) से कर्ता अर्थ में ण्वुल्। उपधावृद्धि।

५७२. अधोऽधः—'उपर्यध्यधसः सामीप्ये' (८।१।७) से सामीप्य गम्यमान होने पर 'अधः' का दो बार उच्चारण हुआ। 'द्वितीयाऽऽम्रेडितान्तेषु—' इस कारिका से 'अधर' शब्द से द्वितीया हुई।

५७३. उपर्युपरि—यहाँ भी (५७२) में जैसे कार्य हुआ है वैसे द्विर्वचन और द्वितीया विभक्ति होती है। 'सामीप्य' यहाँ भी गम्यमान है। भौंरा सिर के ऊपर लगभग छूता हुआ ही मँडराता है।

५७४. विशेषयामि—अतिशये, बढ़ता हूँ, अधिक होता हूँ।

५७५. सतः सर्वतः—'उभसर्वतसोः कार्या—' इस कारिका से 'सत्' से द्वितीया। दुष्कृतः परितः—'अभितः परितः समया—' इत्यादि वचन के अनुसार 'दुष्कृत्' से द्वितीया।

५७६. मां प्रति नासौ वीरः, स हि भीलुकान्नातिभिन्नः ।

५७७. गृहं प्रति प्रस्थितोहं मध्येपथं प्रियवयस्ये हरदत्ते एकद्वान् दिवसान् वत्स्यामि ।

५७८. यः प्रकृत्या चारुस्तस्याहार्येण गुणेन नार्थः ।

५७९. रामो मत्तो मासेन पूर्वः, श्यामश्चाध्यर्धेन मासेनावरः ।

५८०. ग्रामादारादारामः । एषा विहारस्थली ग्राम्याणां सक्षणानाम् ।

५८१. अलंकुमारिरियं कुमारः । प्रशस्तमेतयोर्दाम्पत्यं भविष्यति ।

५८२. तस्य रूपाद्विसंवदति शीलम् ।

५८३. दक्षिणास्तन्तुवायगृहेभ्यस्तुन्नवायगृहाः ।

---

५७६. भीलुकात्—भीरुभीरुकभीलुकाः—अमर ।

५७७. मध्येपथम्—पथो मध्ये । 'पारे मध्ये षष्ठ्या वा' (२।१।१८) से अव्ययीभाव । 'ऋक्पूरब्धू—' (५।४।७४) से 'अ' समासान्त । 'भ' संज्ञा होने से टि लोप । हरदत्ते—सामीपिक अधिकरण में सप्तमी । एकद्वान्—एको वा द्वौ वा । 'संख्ययाऽव्ययासन्नाधिक—' (२।२।२५) इस शास्त्र से बहुव्रीहि समास होता है । 'बहुव्रीहौ संख्येये—'(५।४।७३) से डच् समासान्त होता है । टि (द्वि का इ) का लोप होकर विशेष्य (दिवस) के लिङ्ग के अनुसार पुँल्लिङ्ग होता है । 'वा' शब्द यहाँ संशय अर्थ में है विकल्प में नहीं । संशय अनियत संख्या की ओर संकेत करता है । अतः 'द्वित्राः' यहाँ बहुवचन उपपन्न होता है, क्योंकि द्वौ वा कहने पर 'त्रयः' भी बुद्धि में अवश्य भासते हैं । तत्त्वबोधिनीकार का यह समाधान प्रकृत में ठीक नहीं बैठता । वस्तुतः संशय होने से एको वा द्वौ वा कहने पर बुद्धि में त्रित्व-सख्या भासती है, अतः 'एकद्वाः' में बहुवचन उपपन्न ही है ।

५७६. मेरे विचार में वह वीर नहीं, वह तो डरपोक से कुछ ज्यादा भिन्न नहीं।

५७७. घर से चल कर रास्ते में अपने प्यारे मित्र हरदत्त के पास दो-एक दिन ठहरूँगा।

५७८. जो स्वभाव से सुन्दर है उसे बाह्य संस्कार से कुछ प्रयोजन नहीं।

५७९. राम मुझ से एक महीना बड़ा है, श्याम मुझ से डेढ़ मास छोटा है।

५८०. ग्राम के निकट बाग है। यह लब्धावकाश ग्रामीणों की सैरगाह है।

५८१ यह कुमार इस कुमारी के योग्य है। इन दोनों का सुन्दर जोड़ा बनेगा।

५८२. उसका शील रूप से भिन्न है।

५८३. जुलाहों के घरों से दर्ज़ियों के घर दक्षिण की ओर हैं।

---

५७८. आहार्येण—बाहिर से लाये गये। गुणेन = संस्कारेण।

५७९. मासेन पूर्वः—'पूर्वसदृशसमोनार्थकलहनिपुणमिश्रश्लक्ष्णैः' (२।१।३१)—इस तृतीया-विधायकशास्त्र से यह ज्ञापित होता है कि पूर्वादि के योग में तृतीया होती है। अध्यर्धेन मासेन—अध्यारूढोऽर्धो यं (मासम्) सः, तेन। बहुव्रीहि।

५८०. आरात्—दूरसमीपयोः। 'अन्यारात्—' (२।३।२९) से इसके योग में पञ्चमी।

५८१. अलंकुमारिः—अलं कुमार्यै इति। 'द्विगुप्राप्तापन्नालंपूर्वगतिसमासेषु प्रतिषेधो वक्तव्यः' यह परवल्लिङ्गता का निषेध करने वाला वार्तिक यहाँ समास का ज्ञापक है, और कोई विधायक शास्त्र नहीं। एकविभक्ति चापूर्वनिपाते' (१।२।४४) से उपसर्जन संज्ञा होकर ह्रस्व हुआ। दाम्पत्यम्—जाया च पतिश्च दम्पती, तयोर्भावः।

५८३. तन्तुवायगृहेभ्यः—तन्तून् वयतीति तन्तुवायः। 'ह्वावामश्च' (३।

५८४. क्व तवोपधानं यत्त्वं बाहुमुपधाय शेषे ?
५८५. सखीनां वचांस्यमृतादपि मधुतराण्यापतन्ति मनसः ।
५८६. अलसं रहयन्ति सम्पदः सर्वाः ।
५८७. न सुष्ठ्वजीर्यन्ममान्नम्, तेनोदर्या मे व्यथाऽभूत् ।
५८८. न जातु पुनरत्रभवत्यपरात्स्यामि ।
५८९. विरला एव त्वादृशा जगति जायन्ते येषां परार्थ एव स्वार्थः । आत्मम्भरयस्तु भूरयः ।

५९०. दारिद्र्यं हि विहन्ति मनोरथान् उपहन्ति च मानसम् ।

५९१. राजानः प्रजा धर्मेण प्रशिष्युर्दुष्टांश्च यथाशास्त्रं शिष्युः ।

५९२. अनुजानीहि मां गमनाय । चिरं मे प्रोषितस्य । आध्यायति मामम्बा ।
५९३. गम्यतां पुनर्दर्शनाय । शिवास्ते सन्तु पन्थानः ।
५९४. अपोऽशान, उदश्विद्धा, यथाकामं समाचर ।
५९५. ध्रुवं प्रार्थयिष्यामहेऽरातिम् । मा स्म स प्रथममाक्रमीन्नः ।

२।२) से अण् । यहाँ 'गृह्' शब्द से दिग्वाची दक्षिण शब्द के योग में 'अन्यारात्' (२।३।२९) से पञ्चमी हुई । तुन्नवायः = सौचिकः । तुन्नं सच्छिद्रं वयतीति ।

५८५. मनसः—शेषे षष्ठी ।

५८६ रहयन्ति—रह त्यागे चुरादि अदन्त ।

५८७. उदर्या—उदरे भवा । 'शरीरावयवाच्च' (४।३।५५) से यत् ।

५८८. अपरात्स्यामि—अप पूर्वक राध् दिवा० अकर्मक का लृट् । इस धातु के प्रयोग में प्रायः सप्तमी देखी जाती है, कहीं चतुर्थी भी ।

५९१. प्रशिष्युः—प्रपूर्वक शास् का लिङ् । यहाँ प्रभुता, अधिकार

५८४. तुम्हारा सरहाना कहाँ है जो तुम बाँह के ऊपर सिर धरे लेट रहे हो ?
५८५. मित्रों के वचन मन को अमृत से अधिक मीठे लगते हैं।
५८६. आलसी को सब सम्पत्तियाँ छोड़ जाती हैं।
५८७. मुझे खाना हज़म नहीं हुआ, अतः पेट में पीड़ा हो गई।
५८८. फिर कभी भी आप के प्रति अपराध नहीं करूँगा।
५८९. आप जैसे विरले ही इस लोक में जन्मते हैं। जिन्हें दूसरों का प्रयोजन ही अपना प्रयोजन बन गया है। अपने आप को पालन करने वाले तो बहुत हैं।
५९०. दरिद्रता इच्छाओं की पूर्ति में विघ्न करती है और मन को दूषित करती है।
५९१. राजा प्रजा पर धर्मानुसार शासन करें और दुष्टों को शास्त्रानुसार दण्ड दें।
५९२. मुझे (अब) जाने दीजिये। मुझे देर हो गई घर से आये हुए। मेरी माता उत्कण्ठा-पूर्वक मुझे याद करती होगी।
५९३. जाइये, फिर भी दर्शन देना। आप की यात्रा निर्विघ्न हो।
५९४. चाहे पानी पी लो चाहे छाछ, जैसी इच्छा हो वैसे करो।
५९५. हम निश्चय ही शत्रु पर चढ़ाई करेंगे, ऐसा न हो कि वह हम पर पहले वार कर दे।

अपि वा तन्त्रणा अर्थ है। शिष्युः—यहाँ शास् का दण्ड देना अर्थ है।

५९२. आध्यायति—सोत्कण्ठं स्मरति। 'सम्प्रतिभ्यामनाध्याने' (१।३।४६) की वृत्ति में 'आध्यानमुत्कण्ठापूर्वकं स्मरणम्' ऐसा अर्थ निर्देश किया है।

५९४. अशान—अश भोजने क्र्यादि का लोट् म० पु० एक०। उदश्वित्—उदकेन श्वयांत = वर्धते—क्विप्। यह नपुंसकलिङ्ग है।

५९५. प्रार्थयिष्यामहे—अभियास्यामः। प्रपूर्वक ही अर्थ (चुरादि) धातु इस अर्थ को देता है। दूसरा कोई उपसर्ग हो, तो नहीं। आक्रंसीत्—आङ् क्रम्—लुङ्।

५९६. अलं मां भीषयित्वा, नाहं तवैताभ्यो मिथ्याविभीषिकाभ्यो भेष्यामि।

५९७. एवमाभणति लोकः—यत्तृणमप्यधिकमुह्यते तदलमुष्ट्रकस्य पृष्ठभङ्गाय।

५९८. अपि तिष्ठ, अपि याहि। नाहं ते याथाकामीं विरुन्धे।

५९९. मन्त्रहृदयं विविवरीषामीतीतोऽवधानं दीयमानं प्रार्थये।

६००. पृष्ठेनोह्यमानो भारो न तथा बाधते भारिणां यथा शिरसा।

६०१. पटच्चराणि परिदधत इमान्कृषकानवेहि।

६०२. अविद्यमाना अप्यर्थाः क्लिश्नन्ति गृहिणो विद्यमानाश्चापि। अल्पेपि कदर्थयन्ति बहवश्चापि।

६०३. परमार्थं विद्वांसो मुनयः सद्य एव मुच्यन्ते।

---

५९६. अलं भीषयित्वा—'अलंखल्वोः प्रतिषेधयोः—' (३।४।१८) से यहाँ क्त्वा प्रत्यय हुआ।

५९७. पृष्ठभङ्गाय—'नमः स्वतिस्वाहास्वधालंवषड्योगाच्च' (२।३।१६) से चतुर्थी। उष्ट्रकस्य—'अनुकम्पायाम्' (५।३।७६) से 'क' प्रत्यय होता है।

५९८. अपि तिष्ठ, अपि याहि—अपि शब्द का यहाँ 'अपिः पदार्थसंभावना—' (१।४।९६) से अन्ववसर्ग (=कामचारानुज्ञा (जो चाहे करने देना) में कर्मप्रवचनीय है, पर इस संज्ञा का यहाँ कोई फल नहीं। 'प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च' (३।३।१६३) से यहाँ अतिसर्ग (=कामचारानुज्ञा) अर्थ में लोट् होता है। याथाकामीम्—यथाकामंभावः = याथाकाम्यम्। ष्यञ्। स्त्रीत्व विवक्षा में ङीष्, तद्धित 'य' का लोप। याथाकामी।

५९९. विविवरीषामि—विवरीतुमिच्छामि। विपूर्वक वृञ् वरणे से सन्।

५९६. आप मुझे डराइये नहीं। मैं आप की इन गीदड़भभकियों से डरने वाला नहीं।

५९७. ऐसी कहावत है—एक तिनका भी अधिक उठाया हुआ ऊँट की कमर को तोड़ देता है।

५९८. चाहे जाओ, चाहे ठहरो। मैं तुम्हारे स्वेच्छाचार को नहीं रोकता।

५९९. मन्त्र-रहस्य खोलने लगा हूँ अतः चाहता हूँ कि आप इधर ध्यान दें।

६००. पीठ पर उठाया हुआ बोझा भार उठाने वाले को इतना तंग नहीं करता जितना सिर पर उठाया हुआ।

६०१. चीथड़े पहने हुए इन लोगों को किसान जानिये।

६०२. धनादि का अभाव भी गृहस्थ को दुःखी करता है और भाव भी। थोड़ा धन तंग करता है और बहुत भी।

६०३. परम तत्त्व को जानते हुए मुनि तत्काल मुक्त हो जाते हैं।

---

६००. पृष्ठेनोह्यमानः—वह् के प्रयोग में अधिकरण की करण संज्ञा नियम से व्यवहार में देखी जाती है। 'विवक्षातः कारकाणि भवन्ति' इस शीर्षक का निबन्ध हमारी कृति 'प्रस्तावतरङ्गिणी' में पढ़िये।

६०१. पटच्चरम्—पट इवाचरतीति प्रातिपदिकादाचारे क्विप्। ततः शत्रन्ताद् भूतपूर्वे चरट् इति क्षीरस्वामी। जो पहले वस्त्र का काम देता था, अब जीर्ण होने से निकम्मा होगया है। पटच्चरं जीर्णवस्त्रम्—अमर।

६०२. अल्पे— 'प्रथमचरमतयाल्प—' (१।१।३३) से जस् परे 'अल्प' की विकल्प से सर्वनाम संज्ञा होती है। सर्वादिगण में पाठ न होने से प्राप्त नहीं थी।

६०३. परमार्थं विद्वांसः—'विदेः शतुर्वसुः' (७।१।३६) से 'शतृ' को 'वसु' आदेश विकल्प से होता है। 'न लोकाव्ययनिष्ठा—' (२।३।६९) से कृद्योग में प्राप्त षष्ठी का निषेध होकर परमार्थ (कर्म) में द्वितीया हुई।

६०४. यद्बह्वकारं विषयं व्याचक्षाणमन्तरा प्रतिबध्नीथ तन्नाहं रोचयामि।

६०५. गतो वासरः, अवतीर्णा यामिनी।

६०६. सीतां हृत्वा पौलस्त्य आत्मनो वधमाहरत्।

६०७. देवदत्त लघ्वागच्छ, अहमस्मि त्वया कार्यी।

६०८. सखे किं रुष्यसि मे यदनाभाष्यैव मामन्तिकादतिक्रामसि?

६०९. कनीयांसं सहाध्यायिनं बलात्पृष्ठे प्रहृत्य व्यद्रवत्सोमदत्तः।

६१०. उपयुक्तपूर्वाणि पुस्तकानि कनीयसा मूल्येन क्रीत्वा ज्यायसा विक्रीणीते पुस्तकविक्रायः।

६११. वयं गदान्निर्गतं सुहृदं सुखं प्रष्टुं यामः।

६१२. अपध्वंस रे मूढ! मत्समक्षमपि धृष्णोष्यनृतं निगदितुम्?

६१३. पश्चिमे वयसि सुखं निर्वक्ष्यामीति स पिपीलिकावृत्त्या धनं संचेतुं घटते।

६१४. जातु तत्रभवानभिविनीतो गुरूनतिवर्तते। अहो गर्ह्यमेतत्।

---

६०७. कार्यी—कार्यमस्यास्तीति। इनि। ठन् भी हो सकता है—कार्यिकः।

६०८. अनाभाष्य—विना सम्बोधन किये। आङ्पूर्वक भाष् का अभि-सम्बोधन अर्थ है। स्यादाभाषणमालापः—अमर।

६०९. यहाँ प्रपूर्वक हृञ् हरणे के प्रयोग में जिस पर प्रहार किया गया है उस में द्वितीया (सहाध्यायिनम्) और जिस अङ्ग (पृष्ठ) पर प्रहार है उस से सप्तमी का व्यवहार शिष्टानुमत है।

६१०. विक्रीणीते—'परिव्यवेभ्यः क्रियः' (१।३।१८) से आ०।

६०४. जो आप लोग व्याख्या करते हुए वक्ता को बीच में टोकते हो, सो मुझे अच्छा नहीं लगता।

६०५. दिन बीत गया है, रात उतर आई है।

६०६. सीता को हरण कर रावण ने अपनी मृत्यु को बुला लिया।

६०७. हे देवदत्त जल्दी आओ, तुम से मुझे कुछ काम है।

६०८. मित्र क्या कुछ रुष्ट हो जो बुलाये बिना ही पास से निकल रहे हो?

६०९ अपने से छोटे सहपाठी की पीठ पर चोट मार कर सोमदत्त भाग गया।

६१०. पुस्तक-विक्रेता थोड़े दामों से बर्ती हुई पुस्तकें खरीद कर बड़े दामों पर बेचता है।

६११. हम रोग से छूटे हुए अपने मित्र का स्वास्थ्य पूछने जा रहे हैं।

६१२. अरे मूर्ख, दूर हो। मेरे सामने भी झूठ बोलने का साहस करते हो।

६१३. पिछली उम्र में सुख भोगूंगा इस आशा से वह धीरे-धीरे धन जुटाने का यत्न कर रहा है।

६१४. सुशिक्षित होते हुए आप गुरुओं का उल्लंघन करते हैं, यह कितनी निन्दा की बात है।

पुस्तकविक्रायः—पुस्तकानि विक्रीणीत इति। कर्मण्यण्।

६१२. अपध्वंस— 'ध्वंसु गतौ च' इस धातुपाठ के प्रमाण से ध्वंस् का अर्थ जाना भी है। अनुदात्तेत्त्व के होने पर कभी आत्मने० नहीं भी होता, सो यहाँ परस्मैपद हुआ। ऐसा ही प्रयोग नाटकादियों में देखा गया है।

६१३. निर् वह् से लट्। सुखम्—क्रियाविशेषण। घटते=चेष्टते=यतते।

६१४. अतिवर्तते—यहाँ काल सामान्य में 'गर्हायां लडपिजात्वोः' (३।३।१४२) से जातु शब्द उपपद होने पर और निन्दा की प्रतीति होने पर लट् हुआ।

६१५. अनक्षरस्यापि दृश्यतेऽक्षरलब्धिरिति श्रुते श्रोतव्ये च समो नो निर्वेदः साम्प्रतम् ।

६१६. कामये भोक्तुम् । त्वरय मे भोजनम् ।
६१७. दवीयान्नो गन्तव्यो ग्रामः, अल्पावशेषमहः । तेन त्वरिततरेण क्रमेण यामः ।
६१८. अहमपि विदिशागामिनं सार्थमनुप्रविष्टः, तेनावशिष्टमध्वानं क्षेमेणात्यायम् ।
६१९. नियमे स्थितो बटुर् अभ्युदितो मा स्म भूवमिति प्रातस्तरां संजिहीते ।
६२०. हस्त्यश्वरथपादातमिति चतुरङ्गं सैन्यं भवति ।
६२१. अतिनिद्रं शेषे । अहो आलस्यम् ।
६२२. आशुरयमश्वो न शक्यो हेलया वल्गासु ग्रहीतुम् ।

---

६१५. अक्षरलब्धिः—न क्षरतीति । अक्षरं परं ब्रह्म ।

६१६. कामये भोक्तुम्—यहाँ इच्छार्थक समानकर्तृक 'कामि' धातु उपपद होने पर 'समानकर्तृकेषु तुमुन्' (३।३।१५८) से 'भुज्' से तुमुन् हुआ । त्वरय—त्वर् से णिच् करके लोट् । 'ञित्वरा संभ्रमे' घटादि है, अतः मित् होने से ह्रस्व होता है ।

६१७. दवीयान्—दूरतरः । क्रमेण—पादन्यासेन ।

६१८. सार्थम्—सरतीति सार्थः । 'चलता जाता है' ऐसा व्युत्पत्त्यर्थ है । अत्यायम्—अति—इण्—लङ् । =अत्यक्रामम् ।

६१९. अभ्युदितः—उस ब्रह्मचारी का नाम है जो सूर्य के निकलने पर भी सो रहा है, ऐसा ब्रह्मचारी प्रायश्चित्ती होता है । इसी प्रकार जिस के सो जाने के पश्चात् सूर्य अस्त होता है उसे अभिनिम्रुक्त अथवा अभिनिम्लुक्त कहते हैं । इस पर अमर का वचन है—सुप्ते यस्मिन्नस्तमेति सुप्ते

६१५. अपढ़ पुरुष को भी अक्षर ब्रह्म की प्राप्ति देखी जाती है, अतः अब सुने हुए और सुने जाने वाले शास्त्रादि के प्रति हमारा एक समान विराग है ।

६१६. मुझे भूख लग रही है, भोजन जल्दी भेजिये ।

६१७. हमारे पहुँचने का गाँव बहुत दूर है, दिन थोड़ा बाकी है, अतः हमें जल्दी-जल्दी पग उठाना चाहिये ।

६१८. मैं भी भिलसा जाने वाले काफ़ले में सम्मिलित हो गया, जिससे मेरी शेष यात्रा बिना क्षति के कट गई ।

६१९. नियमवान् ब्रह्मचारी सूर्य मुझे सोते हुए न निकले इस चिन्ता से बहुत सवेरे उठता है ।

६२०. हाथी, घोड़े, रथ और प्यादे—ये सेना के चार अङ्ग होते हैं ।

६२१. नींद का समय हो चुका और तुम सो रहे हो । कितना आलस्य !

६२२. यह (बहुत) तेज़ घोड़ा है । इसे वागों से वश में करना आसान नहीं ।

यस्मिन्नुदेति च । अंशुमानभिनिम्लुक्ताभ्युदितौ तौ यथाक्रमम् ॥ संजिहीते—'कलिः शयानो भवति संजिहानस्तु द्वापरः' इस ऐतरेय ब्राह्मण की श्रुति की व्याख्या में सायण कहता है—सम्पूर्व ओहाङ् गताविति धातुः शय्यापरित्यागे वर्तते ।

६२०. हस्त्यश्व०—यह समाहार द्वन्द्व है । 'द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम्' (२।४।२) से एकवद्भाव होता है । पादातम्—पदातीनां समूहः । 'भिक्षादिभ्योऽण्' (४।२।३८) से अण् । 'पादातं पत्तिसंहतिः—' अमर ।

६२१. अतिनिद्रम्—'असम्प्रति' अर्थ में 'अव्ययं विभक्तिसमीप—' (२।१।६) से अव्ययीभाव । निद्रा सम्प्रति न युज्यत इत्यतिनिद्रम् ।

६२२. वल्गासु ग्रहीतुम्—यहाँ सप्तमी व्यवहार शिष्टसंमत है । आलाने गृह्यते हस्ती वाजी वल्गासु गृह्यते ।

६२३. वेगवाहिनीयं वाहिनी न सहसाऽवगाह्या ।

६२४. एषाऽऽयाति ते मातेति मा स्म रोदीः शिशो !

६२५. राज्ञः सिद्धिश्चमूपतिचातुरीमन्वायतते नाम ।

६२६. कियच्चिरं भङ्गुरेयं तनूः स्थास्यति ।

६२७. खलप्वो वृत्तिस्तथैव संभावनीयाऽऽवश्यकी च यथा द्विजातेः ।

६२८. तिर्यञ्चोपि सीतानिर्वासने दुःखसब्रह्मचारिण इति कविर्दिङ्नागो निरूपयति ।

६२९. अयमसत्येऽभिनिवेशो नियतमुत्सादयिष्यति वः ।

६३०. अहं सुतस्य श्वो गमनं संविदधामि ।

६३१. आमनन्ति शास्त्राणि—पतिः प्रदीपो भवति पत्नी च तस्य प्रभा, स द्रुमो भवति सा च वल्लरी, स वीर्यं भवति सा च श्रीः, स आत्मा भवति सा च तनूरिति ।

६३२. वात्याभिभूतो व्याघ्रो भयसंपिण्डिताङ्गो गुल्मेषु केषुचिच्छरणमन्वैच्छत् ।

६३३. अहं सर्वं मे धनमेकस्या वंश्याः प्रति तस्मै कामतोऽयच्छम् ।

---

६२५. चमूपतिचातुरीम्—चमति भक्षयति (परसैन्यम्) इति चमूः । चम्वाः पतिः, तस्य चातुरी, ताम् । चातुर्य—से स्त्री विवक्षा में ङीष् और य लोप होने पर 'चातुरी' रूप सिद्ध होता है। अनुपूर्वक आयतते सकर्मक है ।

६२७. खलप्वः—खलं पुनातीति, तस्य । 'ओः सुपि' (६।४।८३) से यण् ।

६२८. दुःखसब्रह्मचारिणः—एक ही वेद में व्रत धारण करने वाले ब्रह्मचारी सब्रह्मचारी कहलाते हैं । एकब्रह्मव्रताचारा मिथः सब्रह्मचारिणः—अमर । ब्रह्मचारी तपस्वी होता है, अतः उपचार से अर्थ हुआ जो दुःख

६२३. यह नदी बड़े बहाव से बह रही है। इस में बिना सोचे-समझे नहीं उतरना चाहिये।

६२४. हे बच्चे! तेरी माता अभी आ रही है, इसलिये मत रो।

६२५. राजा की सिद्धि सेनापति की चतुराई पर निर्भर है, यह मानी हुई बात है।

६२६. यह विनाशी शरीर कब तक ठहरेगा?

६२७. भंगी का व्यवसाय उतना ही संमान के योग्य तथा आवश्यक है जितना ब्राह्मण का।

६२८. मृगादि पशु भी सीता के निर्वासन पर उस के साथ दुःख मना रहे हैं, इसे दिङ्नाग कवि (अपने नाटक में) दिखाता है।

६२९. झूठ में आप का यह हठ आप का विध्वंस कर देगा।

६३०. मैं अपने पुत्र के कल जाने की तैयारी कर रहा हूँ।

६३१. शास्त्र कहते हैं—(यदि) पति दीया है तो पत्नी उस की प्रभा है, (यदि) वह वृक्ष है तो वह बेल है, (यदि) वह सामर्थ्य है तो वह लक्ष्मी है, (यदि) वह आत्मा है तो वह शरीर है।

६३२. आँधी से तंग आया हुआ व्याघ्र अपने शरीर को सिकोड़ कर किन्हीं झाड़ियों में अपना बचाओ ढूँढ़ता था।

६३३. मैं ने अपनी इच्छा से अपना सारा धन उसे एक बाँसुरी के बदले में दे दिया।

में सीता के साथी तपस्वी हैं।

६२९. उत्सादयिष्यति—उद् पूर्व षद्लृ विशरणगत्यवसादनेषु से णिच् करने पर लृट्।

६३२. वात्याभिभूतः—वातानां समूहो वात्या। 'पाशादिभ्यो यः' (४।२।४९) से य प्रत्यय।

६३३. वंश्याः प्रति—यहाँ 'प्रति' प्रतिदान अर्थ में कर्मप्रवचनीय है और इसके योग में 'प्रतिनिधिप्रतिदाने च—' (२।३।११) से पञ्चमी हुई।

६३४. न खलूच्चैस्तमं पदमभीतेरास्पदं भवति ।

६३५. उपस्थितो नौ वियोग इति चिन्तया सीताया अक्षिणी उदश्रुणी अभूताम् ।

६३६. जनकस्त्विदं कन्याललाम कस्मै देयमिति निश्चेतुं नाशकत् ।

६३७. अद्याहं पाप मृत्यवे त्वा परिददामि ।

६३८. यदि क्षुध्यति तेऽरातिः, तमाशय, यदि तृष्यति पायय । यस्मादेवमाचरंस्त्वं तमनुतापेन महता धक्ष्यसि ।

६३९. येऽस्मान्द्वेक्ष्यन्ति ते पराभविष्यन्ति ।

६४०. यदि रहस्यमुद्भेत्स्यते सम्पन्नमपि कार्यं विपत्स्यते ।

६४१. श्वोहमितो गन्तास्मि परश्वश्च परापतितास्मि ।

६४२. अद्यानध्याय इति पर्वतके स्वैरं विहरिष्यामो विविधाश्च खेलाः खेलिष्यामः ।

६४३. ये व्यसनेषु प्रसजन्ति ते समुत्सीदन्ति । एष नियामः ।

६३४. 'आस्पदं प्रतिष्ठायाम्' (६।१।१४६) से 'आस्पद' शब्द निपातन किया गया है ।

६३५. उदश्रुणी—उद्गतान्यश्रूणि ययोस्ते (द्विवचन) । अक्षिणी और उदश्रणी में 'ई' की 'ईदूदेद्द्विवचनं प्रगृह्यम्' (१।१।११) से प्रगृह्य संज्ञा होकर 'प्लुतप्रगृह्या अचि नित्यम्' (६।१।१२५) से प्रकृतिभाव हुआ ।

६३६. कन्याललाम—कन्यासु श्रेष्ठम् । अमर अदन्त ललाम शब्द नपुंसकलिङ्ग में पढ़ता है । यादव (वैजयन्तीकार) इसे नकारान्त भी मानता है । ललामोऽस्त्री ललामापि इत्यादि । प्रकृति में ललामन् शब्द है ।

६३७. परिददामि—परि पूर्वक दा का अर्थ सुपुर्द करना, भेंट करना है । परिः सर्वतो भावे ।

६३८. अरातिः—रा दाने से क्तिन् होने पर 'राति' (=दान) रूप सिद्ध

६३४. बहुत ऊँचा दर्जा भय रहित नहीं होता।

६३५. हम दोनों के वियोग का समय आ गया है यह सोचते ही सीता की आँखें डबडबा गईं।

६३६. पिता तो निश्चय न कर पाया कि इस कन्यारत्न को किसे देना चाहिये।

६३७. हे पापी, आज तुम्हें मृत्यु के हवाले करता हूँ।

६३८. यदि तेरा शत्रु भूखा है तो उसे खिला, यदि वह प्यासा है तो उसे पिला, क्योंकि ऐसे करने से तू उसे बड़े पश्चात्ताप से दग्ध करेगा।

६३९. जो पासों से जुआ खेलेंगे वे नष्ट हो जायेंगे।

६४०. यदि भेद खुल गया तो बना-बनाया कार्य बिगड़ जायगा।

६४१. मैं कल यहाँ से जाऊँगा और परसों लौट आऊँगा।

६४२. आज पढ़ाई नहीं होगी, इसलिये पहाड़ी पर मनचाही सैर करेंगे और नाना खेलें खेलेंगे।

६४३. जो व्यसनों में फँसते हैं वे नष्ट हो जाते हैं, यह नियम है।

होता है। अविद्यमाना रातिरस्य इत्यरातिः (जो देता नहीं)। आर्यों में जो पात्र को सामर्थ्य रखता हुआ भी नहीं देता था, उसे समाज का शत्रु समझते थे। यही भाव अराति शब्द के शत्रुपर्याय होने में कारण है।

६३९. अक्षान्देविष्यन्ति—देवन क्रिया में अक्ष स्पष्ट ही करण है तथापि 'दिवः कर्म च' (१।४।४३) से करण की कर्मसंज्ञा विधान की है, चकार सूत्र में इसलिये है कि यथाप्राप्त करणसंज्ञा भी रहे। कर्मसंज्ञा कैसे संगत होती है इसके लिये हमारी कृति 'शब्दापशब्दविवेकः' की भूमिका में कारक प्रकरण देखिये।

६४०. विपत्स्यते—विपूर्वक पद् का लृट्।

६४२. स्वैरम्—स्वेच्छया।

६४३. नियामः—'यमः समुपनिविषु च' (३।३।६३) से विकल्प से अप् होता है, पक्ष में घञ् होगा। यह घञन्त रूप है।

६४४. यदि संस्कृतस्यात्यमृतं माधुर्यं पास्यसि न भाषान्तरेषु तर्षिष्यसि ।

६४५. ब्रह्मोज्झो मा स्म भूवमिति यावज्जीवं श्रुतिषु जागरिष्यामि ।

६४६. प्राज्ञो मेधावी वटुरयं क्षेपीयः शास्त्रार्थं प्रतिपत्ता संभावनां च महतीं कर्ष्टा ।

६४७. राघवाः पञ्चचूडाः कर्तारो भवन्ति ।

६४८. कायस्था लेखितारो भवन्ति ।

६४९. स्वर्णकाराः कलां हर्तारो भवन्तीति कलादा उच्यन्ते ।

६५०. पायं पायं काव्यामृतमवधीरयति सुधाम् ।

६५१. हृतसर्वस्वो हि जीवनाशं नश्यति । अर्था हि प्राणिनो वहिश्चराः प्राणाः ।

६५२. अर्थार्थिनः पुरुषवाहं वहन्ति वाहनानि ।

---

६४४. अत्यमृतम्—अतिक्रान्तममृतम् । 'अत्यादयः क्रान्ताद्यर्थे द्वितीयया' इस वार्तिक से यहाँ प्रादि तत्पुरुष हुआ ।

६४५. ब्रह्मोज्झः—ब्रह्म उज्झतीति । कर्मण्यण् । उज्झ उत्सर्गे तुदादि परस्मैपदी ।

६४६. क्षेपीयः—क्षिप्रतरम् । क्षिप्र—ईयसुन् । प्रतिपत्ता—प्रतिपूर्वक पद गतौ (आत्मने०) से लुट् प्रथम पु० एक० । कर्ष्टा—कृष्—लुट् ।

६४७. कर्तारः—यहाँ 'तृन्' (३।२।१३५) से तद्धर्म अर्थ में 'कृ' से तृन्प्रत्यय होता है । इस सूत्र में 'आ क्वेस्तच्छीलतद्धर्मतत्साधुकारिषु' (३।२।१३४) यह अधिकार उपस्थित है । 'न लोकाव्ययनिष्ठाखलर्थतृनाम्' (२।३।६९) से कृद्योग में प्राप्त षष्ठी का निषेध हो जाने से अनुक्त कर्म में द्वितीया (पञ्चचूडाः) हुई ।

६४४. यदि तू संस्कृत की अमृत को पछाड़ देने वाली मिठास का पान करेगा, तुझे दूसरी भाषाओं की प्यास नहीं रहेगी।

६४५. मैं कहीं ब्रह्म (=वेद) का त्याग करने वाला न बन जाऊँ, इस हेतु श्रुति में जीवन भर जागरूक रहूँगा।

६४६. बुद्धि और स्मृति युक्त यह ब्रह्मचारी बहुत शीघ्र शास्त्रार्थ समझ लेगा और बड़े मान को प्राप्त करेगा।

६४७. राघवों की पाँच शिखाएँ रखने की कुलरीति (धर्म) है।

६४८. कायस्थ लोग अच्छे लेखक (लिपिकर, अक्षरचण) होते हैं।

६४९. स्वर्णकार सोने में से कुछ अंश चुरा लेते हैं यह उनका स्वभाव है, अतः उन्हें 'कलाद' कहते हैं।

६५०. काव्यामृत पी-पी कर 'सुधा' को कुत्सित समझता है।

६५१. जिस का सर्वस्व नष्ट हो गया वह जीता हुआ ही मर गया, क्योंकि प्राणी का धन उस का बाह्य प्राण है।

६५२. रुपये पैसे की अपेक्षा रखने वाले पुरुष (=प्रेष्य=नौकर) होकर गाड़ियाँ खींचते हैं।

---

६४८. लेखितारः—यहाँ तृन् तत्साधुकारी अर्थ में हुआ है। लेखनं साधु कुर्वन्ति, जो अक्षरविन्यास बहुत सुन्दर करते हैं।

६४९. हर्तारः—यहाँ तृन् तच्छील अर्थ में हुआ है। हरणशीला इत्यर्थः। यहाँ भी पूर्ववत् कला (कर्म) में द्वितीया हुई। कलादाः—कलाम् आददत इति। मूलविभुजादित्वात् कः।

६५०. पायं पायम्—'आभीक्ष्ण्ये णमुल् च' (३।४।२२) से णमुल्। 'नित्यवीप्सयोः' (८।१।४) से द्विर्वचन।

६५१. जीवनाशम्—'कर्त्रोर्जीवपुरुषयोर्नशिवहोः' (३।४।४३) से यहाँ जीव उपपद होने पर नश् धातु से णमुल् होता है।

६५२. पुरुषवाहम्—यहाँ भी (६५१) में कहे प्रमाण से णमुल् होता है। पुरुष का अर्थ यहाँ भृत्य है जैसे 'राजपुरुषः' में।

६५३. पाण्युपघातं मुखे हन्त्युपाध्यायश्छात्रम् ।
६५४. काण्डलावं लुनाति रक्षसां शिरांसि रामः ।
६५५. मृद्भेदं भिनत्ति गोपुराणि वीरः ।
६५६. अहो मुनिप्रभावादारण्यका अपि रामाचारमाचरन्ति ।

६५७. यष्टिग्राहं युध्यन्ते परैः सहसाऽऽक्रान्ताः ।

६५८. चौरश्चौर इत्याक्रोशञ् शय्योत्थायं धावति गृही ।

६५९. नियुयुत्समाना मल्ला बद्धपरिकरा अक्षवाटमवतरन्ति ।

६६०. हेयोपादेये विदित्वा हेयं जिहास, उपादेयं चादित्सस्व ।

---

६५३. पाण्युपघातम्—यहाँ 'करणे हनः' (३।४।३७) से करण उपपद होने पर 'हन्' से णमुल् होता है और अनुप्रयोग भी (कषादिषु यथाविध्यनुप्रयोगः) हन् का ही होता है। पर हन् यहाँ अहिंसार्थक है। इसका ताड़ना अर्थ है।

६५४. काण्डलावम्—'उपमाने कर्मणि च' (३।४।४५) से उपमानभूत कर्म उपपद होने पर धातुमात्र से णमुल् का विधान है। काण्डमिव लुनातीत्यर्थः।

६५५. मृद्भेदम्—यहाँ भी (६५४) में कहे प्रमाण से भिद् धातु से णमुल् हुआ।

६५६. रामाचारम्—यहाँ 'उपमाने कर्मणि च' इस सूत्र में 'च' पूर्व सूत्र से कर्ता का अनुकर्षण करने के लिए है। सो यहाँ उपमानभूत राम कर्ता

६५३. गुरु शिष्य के मुख पर चपत देता है।
६५४. भगवान् राम राक्षसों के सिरों को सरकंडे की तरह काट रहे हैं।
६५५. वीर पुरुष नगर के द्वारों को मिट्टी की तरह फोड़ रहा है।
६५६. आश्चर्य है मुनिप्रभाव से जंगल के लोग भी राम का सा आचरण करते हैं।
६५७. शत्रुओं से सहसा आक्रान्त हुए वे लाठी हाथ में लेकर लड़ रहे हैं।
६५८. चोर-चोर ऐसा चिल्लाता हुआ गृहस्थ शय्या से उठते ही दौड़ता है।
६५९. द्वन्द्व-युद्ध करने की इच्छा से कमर कस कर मल्ल अखाड़े में उतरते हैं।
६६०. त्याज्य और ग्राह्य वस्तुओं को जान कर त्याज्य को त्यागने की इच्छा कर, और ग्राह्य को ग्रहण करने की।

है। आङ्-पूर्वक चर् से णमुल्। रामाचारमाचरन्ति=यथा राम आचरत् तथाऽऽचरन्ति।

६५७. यष्टिग्राहम्—'द्वितीयायां च' (३।४।५३) से त्वरा गम्यमान होने पर ग्रह् से णमुल् होता है। ऐसी जल्दी करते हैं कि यदि लाठी हाथ में आई उसे ही लेकर लड़ना प्रारम्भ करते हैं, आयुधविशेष ढूँढने का उन्हें कोई समय नहीं।

६५८. शय्योत्थायम्—यहाँ 'अपादाने परीप्सायाम्' (३।४।५२) से अपादान (यहाँ शय्या) उपपद होने पर यथापूर्व त्वरा गम्यमान (प्रतीत) होने पर उद् स्था से णमुल् हुआ है। शय्याया उत्थाय इत्यर्थः।

६५९. नियुयुत्समानाः=नियोद्धुमिच्छन्तः। नि-युध्—सन्—शानच्।

६६०. जिहास—ओहाक् त्यागे से सन् करके लोट्। आदित्सस्व—आङ् पूर्वक दा से सन् ततः लोट्। 'पूर्ववत्सनः' (१।३।६२) से आत्मनेपद।

६६१. किमिति मन्दायसे सखे, त्वरितं क्राम। अस्त्यावयोर्भूयानध्वशेषो गन्तव्यः।
६६२. पश्य लोहितायतेऽस्य वदनं क्रोधेन। मा स्म प्रहार्षीदित्यपवाहयाऽऽत्मानम्।
६६३. पुत्त्रिणोऽपि पुत्त्रीयन्ति किमुताऽपुत्त्राः।
६६४. दीर्घोऽध्वा गन्तव्य इत्यश्वीयामः।
६६५. आश्चर्यं यद् भीरुरपि वीरायते।
६६६. इह देशे गुरूयन्ति गुरुपुत्त्रम्।
६६७. अल्पकेऽपि स्वे गेहे यथा सुखायामहे न तथा महत्यपि परवेश्मनि।
६६८. धनीयामो योगक्षेमं वहेमेति न तु धनायामः।

६६९. उदकीयामः स्नास्याम इति, न तूदन्यामः।

---

६६१. मन्दायसे—यहाँ 'भृशादिभ्यो भुव्यच्वेर्लोपश्च हलः' (३।१।१२) से च्व्यर्थ में 'मन्द' से क्यङ् प्रत्यय होता है। अमन्दो मन्दो भवसीति मन्दायसे।

६६२. लोहितायते—अलोहितो लोहितो भवतीति। 'लोहितडाज्भ्यः क्यष्वचनं भृशादिष्वितराणि' इस वार्तिक से क्यष्। 'वा क्यषः' (१।३।९०) से पक्ष में परस्मैपद भी होगा।

६६३. पुत्त्रिणः—बहवः पुत्त्राः सन्त्येषाम्। यहाँ 'भूमा' (=बहुत्व में) मत्वर्थीय इनि प्रत्यय हुआ है। पुत्त्रीयन्ति—पुत्त्रमात्मन इच्छन्ति। 'सुप आत्मनः क्यच्' (३।१।८) से 'पुत्त्रम्' से क्यच् प्रत्यय हुआ है।

६६४. अश्वीयामः—यहाँ भी पूर्ववत् 'अश्वम्' से क्यच् हुआ है—अश्वमात्मन इच्छामः।

६६५. वीरायते—वीर इवाचरति। यहाँ 'कर्तुः क्यङ् सलोपश्च' (३।

६६१. मित्र धीरे क्यों हो रहे हो, जल्दी-जल्दी कदम उठाओ। अभी हमें बहुत सा रास्ता चलना बाकी है।

६६२. देखो इस का मुख क्रोध के मारे लाल हो रहा है। ऐसा न हो यह प्रहार करे, अतः इस से परे हट जाओ।

६६३. पुत्रों वाले भी पुत्र चाहते हैं, पुत्र-विहीनों का तो क्या कहना।

६६४. हमें लम्बा रास्ता चलना है, अतः हमें घोड़ा चाहिये।

६६५. आश्चर्य है भीरु भी वीरता दिखाये।

६६६. इस देश में गुरु-पुत्र के साथ भी गुरु का सा व्यवहार करते हैं।

६६७. अपने छोटे से घर में जो सुख का अनुभव होता है वह दूसरे के विशाल भवन में भी नहीं।

६६८. हम धन चाहते हैं ताकि योगक्षेम (निर्वाह) साध सकें, हमें धन का लालच नहीं।

६६९. हमें पानी चाहिये, हम स्नान करेंगे, हमें प्यास नहीं।

१।११) से क्यङ् होता है। यद् शब्द उपपद होने के कारण यहाँ 'न यदि' (३।२।११३) से लट् न हो सका।

६६६. गुरूयन्ति—यहाँ 'उपमानादाचारे' (३।१।१०) से उपमानभूत कर्म 'गुरु' से आचार (व्यवहार) अर्थ में क्यच् हुआ। 'अकृत्सार्वधातुकयोर्दीर्घः' (७।४।२५) से गुरु को दीर्घ होता है।

६६७. सुखायामहे—'सुखादिभ्यः कर्तृवेदनायाम्' (३।१।१८) से क्यङ्। सुखायामहे=सुखं वेदयामहे=सुखमनुभवामः।

६६८. धनीयामः—धनमात्मन इच्छामः। क्यजन्त रूप है। धनायामः—यह भी क्यजन्त है, पर यहाँ गर्ध (लालच अर्थ होने से) क्यच् प्रत्यय परे होने पर 'धनाय' ऐसा निपातन किया है—'अशनायोदन्यधनाया बुभुक्षापिपासागर्धेषु' (७।४।३४)।

६६९. उदकीयामः—उदकमात्मन इच्छामः। प्यास अर्थ में क्यजन्त शब्द 'उदन्य' होगा। इस में भी 'अशनाय—' इत्यादि सूत्र प्रमाण है।

६७०. पुस्तकी भवति पण्डित इति पुस्तकीयन्ति सुमेधसः ।

६७१. वियति पतङ्गायते रविरिति पतङ्ग इत्युच्यते ।

६७२. यत्सत्यं परोक्षस्तवेन भृशायते स्नेहः स्वेषु ।

६७३. इयं पुरन्ध्री तत्तदर्थकामुका स्यादिति किं चित्रम् ।

६७४. इयं जरत्यपि कामुकीति महच्चित्रम् ।

६७५. सम्पन्नमिदं भोज्यं रुच्यं रस्यं चेत्यशनायाविरहेऽप्यशनीयामः ।

६७६. किमिति चिरेणागाः ? कस्तेऽन्तरायोऽभूत् ?

६७७. अद्य स महति प्रत्यूषेऽबुद्ध, तेन प्रचलायितोऽस्ति ।

६७८. यथाऽद्याचारीर्वत्स, मा तथास्तथाऽऽयत्याम् ।

---

६७०. पुस्तकी—पुस्तकानि सन्त्यस्येति । 'भूमा' अर्थ में मत्वर्थीय इनि । पुस्तकीयन्ति—पुस्तकान्यात्मन इच्छन्ति । क्यच् ।

६७१. पतङ्गायते—पतङ्ग इवाचरति । क्यङ् । पतङ्गः पक्षिसूर्ययोः—अमर ।

६७२. भृशायते—इसके लिये (६६१) का टिप्पण देखो ।

६७३. तत्तदर्थकामुका—तस्य तस्यार्थस्य कामुका । कमेरुकञ् । 'लष-पतपदस्थाभूवृष—' (३।२।१५४) से ताच्छीलिक उकञ् होता है । यहाँ षष्ठी समास हुआ है । 'उकप्रतिषेधे कमेर्भाषायामप्रतिषेधः' इस वार्तिक से यहाँ षष्ठी होती है, पश्चात् षष्ठी समास हो जाता है । यहाँ 'कामुक' शब्द से स्त्रीत्व-विवक्षा में टाप् हुआ, ङीष् नहीं, कारण कि 'जानपदकुण्डगोण—' (४।१।४२) से मैथुनेच्छावती अर्थ में ही ङीष् विधान किया है, यहाँ इच्छा-मात्र अर्थ है ।

६७५. अशनायाविरहे—अशनायाया विरहः, तस्मिन् । 'अशनायो-

६७०. जिस के पास बहुत सी पुस्तकें हों वह पण्डित हो जाता है इस लिये बुद्धिमान् पुस्तकों की चाह करते हैं।

६७१. आकाश में सूर्य पक्षी की तरह गति करता है, अतः इसे 'पतङ्ग' कहते हैं।

६७२. सच पूछो तो परोक्ष में की गई स्तुति से बन्धुओं में स्नेह पहले से अधिक हो जाता है।

६७३. यह कुटुम्बिनी उस-उस वस्तु की चाह वाली हो इस में आश्चर्य ही क्या है।

६७४. यह बूढ़ी होने पर भी कामातुर है, यह आश्चर्य की बात है।

६७५. यह भोजन बहुत रुचिकर और रसीला तैयार हुआ है, अतः भूख न होने पर भी खाना चाहते हैं।

६७६. तुम देर से क्यों आये ? तुम्हें कौन सा विघ्न आ पड़ा ?

६७७. आज वह बहुत सवेरे उठा, अतः अब ऊँघ रहा है।

६७८. हे पुत्र आज जैसे तू ने आचरण किया आगे वैसा न करना।

दन्यधनायाः—' (७।४।३४) से क्यजन्त रूप 'अशनाय' निपातन किया है, यदि बुभुक्षा अर्थ हो। इस क्यच्प्रत्ययान्त रूप से 'अ प्रत्ययात्' (३।३।१०२) से 'अ' कृत्प्रत्यय होकर स्त्रीत्व विवक्षा में टाप् होता है।

६७६. आगाः—इण् गतौ से आङ् उपसर्ग होकर लुङ्।

६७७. अवुद्ध—बुध अवगमने दिवा० आ० अनिट् का लुङ् प्रथम पु० एक०। प्रचलायितः—घूर्णितः प्रचलायितः—अमर। प्रचल इवाचरतीति प्रचलायते, क्यङ्, क्त।

६७८. आचारीः—आङ् पूर्वक चर् का लुङ्। 'अतो ल्रान्तस्य' (७।२।२) से वृद्धि। मा तथाः—माङ् उपपद होने पर तन् धातु से लुङ् म० पु० एक०। यहाँ 'तनादिभ्यस्तथासोः' (२।४।७९) से विकल्प से सिच् का लुक् होता है। माङ् उपपद होने पर अट् आगम नहीं होता। आयत्याम्—आयतिरुत्तरकालः स्यात्—अमर। आने वाले समय को आयति (स्त्री०) कहते हैं।

६७९. इदानीमासन्नाऽस्तमनवेलेति मा निपत्था वटो !

६८०. उपरते महात्मनि गान्धिनि न केन चिदपाचि, न केन चिदभोजि, न केन चिदशायि, सर्वत्र सर्वैररोदि ।

६८१. स्वे धनेऽप्यनादृताः प्राञ्चः परधने नतरां जगृधुरिति किमु वक्तव्यम् ।

६८२. चुराशीलोऽयं परिचारकः सुतरां कुशलश्चोरिकायाम् । नाद्यापि कर्मगृहीतो लोप्त्रगृहीतो वाऽभूत् ।

६८३. द्वे अस्य भार्ये । एका पाणिगृहीती, अपरा पाणिगृहीता । उभयत्र चायं समं प्रीयते ।

६८४. कथंकारमिक्षुभङ्गं करोषि ? यथाकारं करोमि तथाकारं करोमि, किं तवानेन ?

---

६७९. मा निपत्थाः—माङ् उपपद होने पर पद गतौ का लुङ् म० पु० एक० । यहाँ 'थास्' परे होने पर 'झलो झलि' (८।२।२६) से सिच् का लोप हो जाता है । नि पूर्वक पद का अर्थ लेटना है ।

६८०. उपरते—उप पूर्वक रमु क्रीडायाम् का क्तान्त । उप यहाँ अर्थ को उल्टा देता है । क्रीडा=चेष्टा । उपरामः=चेष्टा का अभाव । उपरत= निश्चेष्ट=मृत । अपाचि, अभोजि, अशायि, अरोदि—ये क्रम से पच्, भुज्, शी, रुद् के कर्म में लुङन्त रूप हैं ।

६८१. नतराम्—नञ् से तरप् होकर अव्यय प्रकर्ष में आम् प्रत्यय होता है । ऐसे ही सुतराम्, नितराम् इत्यादि शब्द सिद्ध होते हैं । जगृधुः— गृधु अभिकाङ्क्षायाम् दिवा० प० अकर्मक से लिट् में रूप ।

६८२. चुराशीलः—चुरां शीलयतीति । 'शीलिकामिभक्ष्याचरिभ्यो णः' इस वार्तिक से अण् का अपवाद 'ण' होता है । 'चुरा' शब्द 'छत्रादिभ्यो णः' (४।४।६२) के गण में पठित होने से साधु है । चोरिकायाम्—चोरिका=

६७९. अब सायं सन्ध्या होने वाली है, अतः हे ब्रह्मचारिन्, लेटो मत।
६८०. महात्मा गान्धी के देहावसान पर न किसी ने खाना पकाया, और न खाया और न कोई सोया। सर्वत्र सब लोगों ने आँसू बहाये।
६८१. अपने धन में भी बहुत प्रीति न करने वाले प्राचीन (आर्य) दूसरों के धन का लालच नहीं करते थे इसमें क्या कहने की बात है।
६८२. चोरी की आदत वाला यह नौकर चोरी करने में बहुत चतुर है। आज तक चोरी करता हुआ अथवा चोरी के माल के साथ यह नहीं पकड़ा गया!
६८३. इस की दो भार्यायें हैं—एक तो विधि-पूर्वक ब्याही हुई और दूसरी अवैध रीति से। दोनों में इस की एक समान प्रीति है।
६८४. ईख को कैसे तोड़ते हो? जैसे तैसे तोड़ता हूं, तुम्हें इस से क्या?

चोरणम्। 'धात्वर्थनिर्देशे ण्वुल् वक्तव्यः' इस वार्तिक से ण्वुल्। 'चोरस्य भावः कर्म वा' ऐसा विग्रह करने पर तो मनोज्ञादित्वात् वुञ् होकर 'चौरिका' रूप होगा। कर्मगृहीतः—कर्मणि गृहीतः। यहाँ 'कर्म' का अर्थ चोरी है, जैसा कि मृच्छकटिक में 'कृत्वा शरीरपरिणाहसुखप्रवेशं, शिक्षाबलेन च बलेन च कर्ममार्गम्। (३।९)' यहाँ कर्ममार्ग शब्द में स्पष्ट है।

६८३. पाणिगृहीती—गृहीतः पाणिरस्याः। बहुव्रीहि। आहिताग्नि आदि शब्दों में से एक होने के कारण 'वाऽऽहिताग्न्यादिषु' (२।२।३७) से निष्ठान्त 'गृहीत' का परनिपात हुआ। 'पाणिगृहीत्यादीनामर्थविशेषे' इस वार्तिक से 'विधिवत्परिणीता' अर्थ में ङीष्। जो जैसे तैसे भार्या हुई है, उस में यथाप्राप्त टाप्—पाणिगृहीता।

६८४. कथंकारम्—'अन्यथैवंकथमित्थंसु—' (३।४।२७) से णमुल्। यथाकारम्, तथाकारम्—'यथातथयोरसूयाप्रतिवचने' (३।४।२८) से न सहते हुए उत्तर देने में यथा, तथा उपपद होने पर कृ से णमुल्।

६८५. खलसम्पर्कः कस्यात्मनीनो भवति ।

६८६. सम्प्रति जीनोऽयं तुरङ्गः । गतोऽस्य पूर्वः परिस्पन्दः । कर्कशान्यस्याङ्गानीति मन्दमन्दमिह गोचरे संचरति शष्पाणि च चरति ।

६८७. यस्याधन्यस्यात्यायो व्ययः स कथं सुखं निर्वहेत् ।

६८८. अस्ति मे मोदकखादिकायामभिलाषः। विपण्यां मौदकिकमुपेहि मोदकांश्च पञ्चषान् क्रीणीहि ।

६८९. सर्वोऽध्ययनेऽधिक्रियतेऽर्थी समर्थः, न तु सर्वोऽध्यापने ।

६९०. यानीह शुच्याचाराणि कुलानि प्रथितानि येषु परम्परीणमौपाध्यायकमाचार्यकं वा समस्ति तत एवाऽध्यापकाः संग्राह्या इति मे दर्शनम् ।

६९१. स्फटिकविशदेन पयःपूरेण मन्दमन्दमकति मन्दाकिनी ।

६९२. साक्षरा अपि केचित्कृच्छ्रेण वृत्तिं वर्तयन्ति ।

---

६८५. आत्मनीनः—'आत्मन्विश्वजनभोगोत्तरपदात्खः' (५।१।९) से 'आत्मने हितः' अर्थ में 'ख' प्रत्यय हुआ ।

६८६. जीनः—ज्या वयोहानौ क्र्यादि (अकर्मक) से क्त प्रत्यय परे रूप । 'संयोगादेरातो—' (८।२।४३) से निष्ठानत्व । 'ग्रहिज्या—' (६।१।१६) से सम्प्रसारण और 'हलः' (६।४।२) से दीर्घ ।

६८७. अत्यायः—अतिक्रान्त आयम् । प्रादि समास ।

६८८. मौदकिकम्—यहाँ 'तदस्य पण्यम्' (४।४।५१) से ठक् प्रत्यय होता है । मोदकाः पण्यमस्येति । पञ्चषान्—पञ्च वा षड् वा (बहुव्रीहि) । 'बहुव्रीहौ संख्येये डजबहुगणात्' (५।४।७३) से डच् समासान्त हुआ और भ संज्ञा होने से टि (='अष्') का लोप हो गया ।

६८५. दुष्टों की संगति किस के अपने हित में हो सकती है ?

६८६. यह घोड़ा अब बूढ़ा हो गया है। इसकी पहली सी फुर्ती अब नहीं रही। इसके अंग सख्त हो गये हैं अतः यह चरागाह में धीरे-धीरे चलता फिरता है और नई-नई घास खाता है।

६८७. जिस अभागे की आमदनी से खर्च ज्यादा है वह कैसे सुख से निर्वाह कर सकता है ?

६८८. मुझे लड्डू खाने की इच्छा है। बाज़ार में हलवाई के पास जाओ और पाँच छः लड्डू खरीद करो।

६८९. पढ़ने का सब को अधिकार है, जो चाहता हो और पढ़ने की सामर्थ्य रखता हो, पर पढ़ाने का सब को अधिकार नहीं।

६९०. जो पवित्र आचार वाले प्रसिद्ध कुल हैं, जिनका परम्परागत उपाध्याय कर्म अथवा आचार्य कर्म है, उन्हीं में से अध्यापकों को लेना चाहिये, ऐसा मेरा विचार है।

६९१. बिलौर की तरह विमल जल राशि के साथ गङ्गा धीरे धीरे चल रही है।

६९२. पढ़े लिखे भी कई लोग कठिनता से जीविका कमाते हैं।

---

६८९. अर्थी—अवश्यमर्थयते इति। 'आवश्यकाधमर्ण्ययोर्णिनिः' (३।३।१७०) से अवश्यम्भाव अर्थ में णिनि प्रत्यय होता है।

६९०. परम्परीणम्—'परोवरपरम्परपुत्रपौत्रमनुभवति' (५।२।१०) से 'परम्पर' शब्द से 'अनुभवति' अर्थ में 'ख' प्रत्यय होता है। 'परम्पर' शब्द यहाँ 'परपरतर' के स्थान में निपातन किया है। औपाध्यायकम्, आचार्यकम्—'योपधाद् गुरूपोत्तमाद् वुञ्' (५।१।१३२) से भाव कर्म में वुञ् प्रत्यय होता है। उपाध्यायस्य कर्म, आचार्यस्य कर्म। उपाध्याय=गुरु, अध्यापक। उपेत्याधीयते यस्मात् सः। आचार्य का लक्षण—उपनीय तु यः शिष्यं वेदमध्यापयेद् द्विजः। सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते॥

६९१. अकति—अक अग कुटिलायां गतौ भ्वादि परस्मैपदी।

६९२. वर्तयन्ति=भावयन्ति=साधयन्ति। वृतु वर्तने से णिच्।

६९३. अद्यत्वे शुल्केनैव वितीर्यंते विद्येति ये नेशते शुल्कं वितरीतुं ते न सहन्ते विद्याकणानप्युच्चेतुं किमुत सारस्वतं सर्वस्वमादातुम् ।

६९४. न हि चिरसंरम्भाणि दैवतानि भवन्ति ।

६९५. धर्मपादपोऽप्याविर्मूलोऽधुनोद्वर्तते तदाश्रितश्च लोकः ।

६९६. एकानूकयोरपि समानाभिविनययोरपि द्वयोर्वैचित्र्यं विद्यते रुचीनाम् ।

६९७. यः परः स द्वेष्यो भवति । परश्च मे नास्ति । अहमन्यमाहन्यामित्युद्यन्नेव विलीयते भावः । कथङ्कारमात्मानमाघ्नीय ?

६९८. य आत्मना विस्मितस्तस्मा अर्थवादः स्वदते न भूतार्थवादः ।

६९९. य ईर्ष्याकषायितस्तस्मै परापवादो रोचते स्वस्य चोच्चैर्वादः ।

---

६९३. ईशते—ईश ऐश्वर्ये अदादि आ० लट् प्र० पु० बहु० । सारस्वतम्—सरस्वत्या इदम् । सर्वस्वम्—सर्वं च तत्स्वं च । कर्मधारय ।

६९४. चिरसंरम्भाणि—चिरं संरम्भो येषां तानि । चिरम्—मकारान्त अव्यय है । दैवतानि—देवता एव दैवतम् । दैवतो वा । पुं० में प्रयोग बहुत कम है ।

६९५. उद्वर्तते—उखड़ रहा है, अक्षरार्थ=ऊपर (=बाहिर) आ रहा है । अत एव 'उद्वर्तन' उबटन अर्थ में प्रयुक्त होता है, जिस से शरीर का मैल उभर आता है ।

६९६. एकानूकयोः—समानकुलयोः । 'शीलान्वयावनूके द्वे' इस अमर वचन के अनुसार 'अनूक' नपुंसक है ।

६९३. आज कल शुल्क ले कर ही विद्या दी जाती है, अतः जो शुल्क नहीं दे सकते वे विद्या-कण भी संगृहीत नहीं कर सकते, सरस्वती के सर्वस्व लेने की तो बात दूर रही।

६९४. देवता चिर तक क्रोध नहीं करते।

६९५. धर्म-तरु की जड़ें नंगी हो रही हैं, वह उखड़ रहा है और तदाश्रित लोक भी।

६९६. एक ही कुल में उत्पन्न हुए और एक सी शिक्षा को प्राप्त हुए दो पुरुषों की रुचियाँ भिन्न देखी जाती हैं।

६९७. जो दूसरा हो उस के प्रति द्वेष हो सकता है। मेरे लिये दूसरा रहा ही नहीं। मैं दूसरे पर प्रहार करूँ यह भाव उदय होता हुआ ही विलीन हो जाता है। मैं अपने आप को कैसे मारूँ?

६९८. जो अभिमानी है उसे मिथ्या स्तुति मीठी लगती है, सचाई नहीं।

६९९. जो ईर्ष्या से उपरक्त है उसे दूसरों की निन्दा अच्छी लगती है और अपनी स्तुति।

---

६९७. अन्यमाहन्याम्—यहाँ धातु के सकर्मक होने से 'आङो यमहनः' (१।३।२८) से आत्मने० न हो सका। उद्यन्—उद्पूर्वक इण् गतौ से शतृ। आघ्नीय—यहाँ धातु के स्वाङ्ग-कर्मक होने से आङ् हन् से 'आङो यमहनः' से आत्मनेपद हुआ। लिङ् उत्तम पु० एक० का रूप है।

६९८. विस्मितः—गर्वितः। 'अहो महानस्मि' इस प्रकार के अपने ऊपर आश्चर्य-भाव को 'विस्मय' (विना 'वि'—'स्मय') कहते हैं। दूसरे शब्दों में इसे 'आहोपुरुषिका' कहते हैं। अर्थवादः—स्तुति, निन्दा—रूप मिथ्या वचन। भूतार्थवादः—भूतार्थः—सत्योऽर्थः, तस्य वादः।

६९९. ईर्ष्याकषायितः—कषायो रसविशेषो रागविशेषो वा। ईर्ष्या-कषायोऽस्य संजात इति। 'तदस्य संजातम्—' (५।२।३६) से इतच् प्रत्यय।

७००. अनभ्यन्तरोऽसि निबन्धनकलायां यदेवमक्रममसमर्थं चोपन्यस्यसि ।

७०१. य इच्छेद् वसीयान्वसिष्ठो वा स्यां प्रथितयशा वा लोकस्याऽभिपूजितो वा भवेयं स साहसमाचरेत् ।

७०२. *न हि व्यापारमन्तरेण करतलगताऽपि शुक्तिर्विमुञ्चति मौक्तिकानि ।

७०३. आभणन्त्याङ्गला अनुद्योगो मनसो मण्डूरमिति ।

७०४. दैवं नाम पथ्यदनं भवति संसारमापन्नस्य जीवस्य ।

७०५. किमीश्वरा वयं यदि परस्य कष्टश्रितस्य समुद्धारे नेश्वराः ।

७०६. विभवो हि भूयसा खलीकरोति सुजनम् ।

७०७. सुखसंवेदात्प्राक्तनी दुःखसंवित्तिरौद्धत्यं वारयति प्रह्वत्वं चोपनमयति ।

७०८. अयं नैशिको ब्रह्मचारी कायक्लेशान् विविधान्विषह्य निगमागमानध्यगीष्ट ।

---

७००. असमर्थम्—असम्बद्धार्थम्, बेजोड़ ।

७०१. वसीयान्, वसिष्ठ—वसुमत् शब्द से ईयसुन् और इष्ठन् प्रत्यय करने पर रूप । 'विन्मतोर्लुक्' (५।३।६५) से मतुप् का लुक् हो गया ।

७०५. किमीश्वराः—कुत्सिता ईश्वराः । 'किं क्षेपे' (२।१।६४) से समास हुआ । ईश्वराः—'स्थेशभासपिसकसो वरच्' (३।२।१७५) से ताच्छील्लिक वरच् प्रत्यय । स्त्रीलिङ्ग में टाप् होकर 'ईश्वरा' रूप होगा । पुंयोग में ङीष् होकर ईश्वरी (ईश्वर=शिव, की स्त्री, दुर्गा) ।

७०७. उपनमयति—'ज्वलह्वलह्मलनमामनुपसर्गाद्वा' इस गणसूत्र से

७००. तुम्हें निबन्धन कला का परिचय नहीं जो इस प्रकार क्रमहीन और परस्पर सम्बन्ध-रहित वाक्य-विन्यास करते हो।

७०१. जो चाहता है कि मैं पहले अधिक धन वाला अथवा बहुत बड़े धन वाला हो जाऊँ, अथवा मेरा यश फैल जाय और लोक में सम्मान पाऊँ, वह साहस करे।

७०२. *बिना यत्न के तो हथेली पर पड़ी हुई सीपी भी मोती नहीं छोड़ती।

७०३. अंगरेजों में कहावत है कि उद्यमाभाव मन का ज़ंग है।

७०४. दैव आवागमन में पड़े हुए जीव के लिये यात्रा का भोजन (पाथेय) है।

७०५. हमारा ऐश्वर्य किस काम का यदि हम कष्टापन्न व्यक्ति का उद्धार नहीं कर सकते।

७०६. बहुत बार ऐश्वर्य सज्जन को दुर्जन बना देता है।

७०७. सुखानुभव से पूर्व होने वाली दुःख की अनुभूति अकड़पन को परे रखती है और नम्रता लाती है।

७०८. रात्र्यध्ययन के अभ्यासी इस ब्रह्मचारी ने अनेक शारीरिक कष्टों को सह कर वेद और शास्त्रों का अध्ययन किया।

उपसर्गरहित नम् की मित् संज्ञा नहीं भी होती, उपसर्ग होने पर तो अमन्त होने से नित्य होती है।

७०८. नैशिकः—निशासहचरितमध्ययनं निशा (रात में होने वाले अध्ययन को भी उपचार से निशा नाम दे दिया गया), तदस्य सोढं (जितम् अभ्यस्तम्) इति। तदस्य सोढम् (४।३।५२) से ठञ् प्रत्यय होता है। विषह्य—'परिनिविभ्यः सेवसितसय—' (८।३।७०) से सह् के स् को मूर्धन्यादेश हुआ। निगमागमान्—निगमो वेदः, आगमः शास्त्रम्। अध्यगीष्ट—अधि इङ्—लुङ्।

७०९. अनुभूतदुःखो जनो यदा सुखमश्नुते, व्यृद्धो वा समृध्यति, व्याधितो वोल्लाघते तदाऽयमुत्प्रेक्षते फलितानि मे सुचरितानीति ।

७१०. ये हि पुत्त्रादयोऽभिमता अर्थाः शब्दादयो वा प्रीतिविषयास्तैः समवाये सुखं व्यवाये च दुःखमिति स्थितिः ।

७११. अतिश्वी सेवेति मनस्विनो नैतामिच्छन्ति ।

७१२. अपध्वंस रे लालाटिक ! कार्यकालेऽपसर्पसि । नाऽर्थो मे त्वयका । कामं याहि दिशो दश

७१३. मध्योऽयं छात्रो नातिपटुर्नाऽप्यपटुः । न न तरति परीक्षाः क्रमेण ।

७१४. यो हि विचारस्वातन्त्र्यमपकर्षति स प्रष्ठं जनौघं पृष्ठतः कर्षति ।

७१५. तातोऽस्य सततं विनीतवेषः । अयं चोल्वणनेपथ्यो नट इव वेष्य इति कथं युज्यते ?

---

७०९. उल्लाघते—उद्पूर्वक लाघृ धातु से लट् । राघृ लाघृ द्राघृ सामर्थ्ये भ्वा० आ० । यहाँ सामर्थ्य से रोगकृत दुर्बलता को छोड़ चलने-फिरने आदि की शक्ति प्राप्त करना विवक्षित है । अमर का पाठ भी है—उल्लाघो निर्गतो गदात् ।

७१०. समवाये—संसर्गे । यहाँ नैयायिकों का पारिभाषिक अर्थ नहीं । इस में भाष्यकारादि शिष्टों के वचन प्रमाण हैं । व्यवाये—व्यवायो व्यवधानम् । पृथग्भावः ।

७११. अतिश्वी—अतिक्रान्ता श्वानम् इति । यहाँ 'अतेः शुनः' (५।४।९६) से टच् समासान्त होता है और टित् होने से स्त्रीत्व विवक्षा में ङीप् ।

७१२. लालाटिक—'संज्ञायां ललाटकुक्कुट्यौ पश्यति' (४।४।४६) से अर्थ विशेष में ललाट शब्द से ठक् प्रत्यय होता है । ललाटं पश्यति इति

७०९. दुःख का अनुभव करके जब कोई सुख को प्राप्त करता है, दरिद्र हो कर समृद्ध होता है अथवा रोगी हो कर स्वस्थ होता है तब यह समझता है कि मेरे पुण्य कर्म फलित हो गये हैं।

७१०. ये जो पुत्रादि इष्ट पदार्थ हैं अथवा शब्दादि प्रीति के विषय हैं इन के साथ संयोग होने पर सुख और वियोग होने पर दुःख होता है ऐसी लोक स्थिति है।

७११. सेवा श्ववृत्ति से भी अवर है, अतः मनस्वी (मानी) लोग इसे नहीं चाहते।

७१२. अरे काम से दूर भागने वाले सेवक, दूर हो। मुझे तुझ से कुछ काम नहीं। जिधर चाहो चले जाओ।

७१३. यह छात्र दरमियाने दर्जे का है, न तो बहुत पढ़ु है और न ही मूर्ख। क्रम से परीक्षाएँ पास कर ही रहा है।

७१४. जो विचार की स्वतन्त्रता को कम करता है वह आगे जाने वाली जनता को पीछे खींचता है।

७१५. इस का पिता सदा नम्र वेष रखता है और यह भड़कीले वेष वाला नट की तरह वेष से अपने आप को सजाए रखता है, यह बात क्योंकर युक्त हो सकती है?

लालाटिकः। ललाट (मस्तक) दूर से दीखता है, सो जो स्वामी के मस्तक को दूर से देखते ही परे टल जाता है उसे लालाटिक कहते हैं। अमर का पाठ इसी अर्थविशेष को बताता है—'लालाटिकः प्रभोर्भालदर्शी कार्याक्षमश्च यः'। त्वयका—यहाँ कुत्सित अर्थ में 'अव्ययसर्वनाम्नाम्—' (५।३।७१) से अकच् प्रत्यय होता है।

७१३. मध्यः—'अ साम्प्रतिके' (४।३।९) से यहाँ 'अ' प्रत्यय हुआ।

७१४. प्रष्ठम्—प्रतिष्ठत इति। 'प्रष्ठोऽग्रगामिनि' (८।३।९२) से निपातन किया है। अर्थान्तर में प्रस्थ रूप होगा।

७१५. वेष्यः—'कर्मवेषाद् यत्' (५।१।१००) से यत् प्रत्यय होता है। वेषेण सम्पद्यते शोभते इति।

७१६. मूढाः पङ्गव इव पर्पेण परेण प्रेक्षावता नेया भवन्ति ।

७१७. यः खलु वाने वा कर्तने वा सेवने वा चिरक्रियः सोऽल्पमेव महता कालेन वयति कृणत्ति सीव्यति वा ।

७१८. योऽसन्तुष्टोऽनाशुतुष्टो वा स्यात् स्यादेव स परवान् ।

७१९. द्विविधा दरिद्राः । एके जात्या दरिद्राः, परे समृद्धपूर्वाः सम्प्रति प्रद्राणकाः ।

७२०. अयं दानीयोऽयमदानीय इति विविच्य पात्रवर्षिणो भवत ।

७२१. मदीयं मदर्थं मदीयार्थं च धनं न जनकीयं भवति ।

७२२. यद्यहं परं दुर्गतमुद्धरामि, आत्मानमेवोद्धरे । परं चे-दनुगृह्णामि, आत्मानमेवाऽनुगृह्णे ।

७२३. द्विविधो हि ब्राह्मणो यायावरः शालीनश्च । यः शिलोञ्छेन जीवति, गृहं च नो निर्माति, याहि याहीति याति स

---

७१६. प्रेक्षावता—प्रेक्षा बुद्धिस्तद्वान्, प्रेक्षावान्, तेन ।

७१७. कृणत्ति—कृती परिवेष्टने रुधादि का लट् में रूप । कृती छेदने तुदादि का इस अर्थ में प्रयोग नहीं होता ।

७१८. परवान्—परः स्वाम्यस्यास्तीति । पराधीन, परायत्त ।

७१९. जात्या=जन्मना । प्रद्राणकाः—प्रपूर्वक द्रा कुत्सायां गतौ का निष्ठान्त 'प्रद्राण' होता है, कुत्सा में 'क' प्रत्यय और हुआ ।

७२०. दानीयः—देयमस्मै इति । 'कृत्यल्युटो बहुलम्' (३।३।११३) यहाँ बहुलग्रहण के बल से सम्प्रदान कारक में कृत्य प्रत्यय अनीयर् हुआ ।

७२१. जनकीयम्—'जनपरयोः कुक् च' यह गणसूत्र है । गहादि गण

७१६. जैसे लंगड़े बैसाखी के बल चलते हैं वैसे ही मूर्ख लोग दूसरे बुद्धिमान् पुरुष से चलाये जाते हैं।

७१७. जो बुनने, कातने अथवा सीने में सुस्ती से काम करता है वह बहुत समय में थोड़ा ही बुनता, कातता अथवा सीता है।

७१८. जिसे सन्तोष नहीं अथवा जो जल्दी सन्तुष्ट नहीं होता वह अवश्य पराधीन होगा।

७१९. दो प्रकार के दरिद्र होते हैं—एक वे जो जन्म से ही दरिद्र हैं, दूसरे वे जो पहले समृद्ध रह कर अब दुर्गति को प्राप्त हुए हैं।

७२०. यह दान के योग्य है और यह नहीं ऐसा विवेक कर के पात्र को उदारता-पूर्वक दो।

७२१. मेरा, मेरे लिये और मेरे लोगों के लिये जो धन है वह दूसरे लोगों का नहीं।

७२२. यदि मैं किसी दूसरे दीन का उद्धार करता हूँ, अपना ही उद्धार करता हूँ। यदि दूसरे पर कृपा करता हूँ, अपने पर ही कृपा करता हूँ।

७२३. ब्राह्मण दो प्रकार का होता है—यायावर और शालीन। जो शिलोञ्छ वृत्ति है, अपना घर नहीं बनाता और चलता रहता है

में पढ़ा है। सो यहाँ 'गहादिभ्यश्च' (४।२।१३८) से शैषिक छ प्रत्यय होता है और इस गणसूत्र से कुक् का आगम होता है। जनानामिदं जनकीयम्।

७२२. परं दुर्गतमुद्धरामि—यहाँ क्रियाफल के परगामित्व की विवक्षा में 'शेषात्कर्तरि परस्मैपदम्' (१।३।७८) से उद्पूर्वक हृञ् हरणे से परस्मैपद हुआ। कर्त्रभिप्राय (कर्तारमभिप्रैति, कर्ता को जाने वाले) फल की विवक्षा में 'स्वरितञितः कर्त्र०—' (१।३।७२) से आत्मने० होता है—आत्मानमुद्धरे।

७२३. यायावरः—यङन्त 'या' धातु से वरच् प्रत्यय। वरच् 'यश्च यङः' (३।२।१७६) से तच्छीलादि अर्थों में विधान किया गया है। याहि याहि—

भवान्यायावरः। शालीनस्तु निगदव्याख्यातः।

७२४. संस्कृते वाङ्मये वह्नूनां पदानामेकार्थकानां कस्कोऽवान्तरो विशेष इत्यत्र नोद्येमिरे प्राज्ञः, न चोद्यच्छन्तेऽर्वाञ्च इति प्रारिप्स्यते मया पर्यायवचनविवेको नाम ग्रन्थः।

७२५. न हि कर्मयोगिणः किमपि भोग्यमस्तीति सोऽपवृज्यते।

७२६. यदीच्छसि लोको मां जानीयान्न चाऽहं किमपि जानीयां तर्हि ग्राममावस। अथेच्छसि वुध्येय वस्तुसतत्त्वं लोकश्च मां मा स्म वुद्धेति तर्हि नगरमुपवस।

७२७. शमं हि सर्वे शास्त्रैकचक्षुष्का लोकैकचक्षुष्काश्च, कारिता अकारिताश्च कामयन्ते।

७२८. लोकास्तु ह्रस्वं पश्यन्ति न दीर्घम्। अपरं पश्यन्ति न परम्। सान्दृष्टिकमेवाऽनुरुध्यन्ते न तूदर्कम्।

यह क्रियासमभिहार में लोट् है। शालीनः—'शालीनकौपीने अधृष्टाकार्ययोः' (५।२।२०) से निपातन किया है। 'शालाप्रवेशनमर्हति' ऐसी व्युत्पत्ति की जाती है।

७२४. कस्कः—'कस्कादिषु च' (८।३।४८) से विसर्ग को 'स्' होता है। उद्येमिरे—'समुदाङ्भ्यो यमोऽग्रन्थे' (१।३।७५) से आत्मनेपद हुआ। उद्पूर्वक यम उपरमे का लिट् प्र० पु० वहु०। प्रारिप्स्यते—प्र आङ्पूर्वक रभ् धातु के सन्नन्त से कर्म में लट्।

७२५. कर्मयोगिणः—'कुमति च' (८।४।१३) से यहाँ प्रातिपदिकान्तस्थ 'न्' को नित्य ण् होता है। अपवृज्यते—मुच्यते, पृथग् भवति, केवलो भवति। अपवर्ग शब्द मोक्ष अर्थ में नैयायिकादि प्रयोग करते हैं। इससे

वह यायावर कहलाता है। शालीन का अर्थ उच्चारण करते ही स्पष्ट हो जाता है।

७२४. संस्कृत साहित्य में एकार्थक नाना पदों के अर्थों में क्या-क्या अवान्तर विशेष है इस विषय में पूर्व विद्वानों ने यत्न नहीं किया, और वर्तमान में भी यत्न नहीं हो रहा, अतः हम 'पर्यायवचन-विवेकः' नामक ग्रन्थ की रचना करना चाहते हैं।

७२५. कर्मयोगी को कुछ भोगना शेष नहीं रहता, अतः वह मोक्ष को प्राप्त हो जाता है।

७२६. यदि तू चाहता है लोग मुझे जानें और मैं कुछ भी न जानूँ, तो ग्रामवास कर। यदि चाहता है मैं वस्तुओं के स्वरूप को जानूँ और मुझे कोई न जाने तो नगर में रह।

७२७. सब लोग चाहे वे केवल शास्त्र को देख कर चलने वाले हों अथवा केवल लोक को, शिक्षित हों अथवा अशिक्षित, शान्ति चाहते हैं।

७२८. सामान्य जनता की छोटी दृष्टि होती है, दूर-दृष्टि नहीं। वह इस लोक को देखती है, परलोक को नहीं। अभी-अभी होने वाले फल को देखती है, भविष्यत् में होने वाले को नहीं।

उनको दुःख से पृथग्भाव अभिप्रेत है। यही उन का मोक्ष है।

७२६. ग्राममावस, नगरमुपवस—यहाँ 'उपान्वध्याङ्वसः' (१।४।४८) से अधिकरण की कर्मसंज्ञा होकर ग्राम और नगर से द्वितीया हुई।

७२७. शास्त्रैकचक्षुष्काः—शास्त्रमेवैकं चक्षुर्येषाम्। एकमात्र शास्त्र पर चलने वाले। कारिताः—शिक्षिताः। अमर में भी पाठ है—कारित-शिक्षिते। (कहीं-कहीं 'काचितशिक्यिते' ऐसा पाठान्तर भी मिलता है)। क्रिया का शिक्षा अर्थ प्रसिद्ध ही है—क्रिया द्रव्यं विनयति नाद्रव्यम् (कौटल्य)। क्रिया हि वस्तूपहिता प्रसीदति (रघुवंश)।

७२८. सान्दृष्टिकम्—संदृष्टं प्रत्यक्षं प्रयोजनमस्य। 'प्रयोजनम्' (५।१।१०९) से ठञ्।

७२९. बद्धमूला दृढं निखाताः पुंसां हृदि कामाः। ते न सहसा शक्या उद्वर्तयितुम्।

७३०. यथा तपस्तापसं सेधयति न तथाऽन्यत्किञ्चित् । तथाप्यपरिग्रहस्तत्राङ्गभावं यातीति नापज्ञायते।

७३१. बालोऽपि सत्त्वेनोपस्कृतो निःसत्त्वं भीलुकं युवानं विप्रकरोति।

७३२. अत्र विषये सदसती विवेक्तारस्तत्त्वं प्रतिपत्तारः प्रवक्तार एव मानं न वयम्।

७३३. शब्दालङ्कृतिप्रियता ह्युद्वेगकरी रसिकानामिति तां नाद्रियेत।

७३४. यत्रैकेन पदेन शक्योऽभिधित्सितोऽर्थो गमयितुं तत्र पदद्वयं मा प्रयुक्थाः।

७३५. यः खलु निःस्वः स इच्छति स्वो मे स्यात् । यः स्ववान् स इच्छति प्रभूततराः स्वा मे स्युरिति।

७३६. स्वार्था परार्था वा सर्वाऽपि प्रवृत्तिः कामायत्ता। कल्याणप्रकृतय एव केचन परार्थं घटन्ते।

---

